ॐ

# ब्रह्मसूत्रानुगुण्यसिद्धिः ।

श्री सर्वतन्त्रस्वतन्त्र महामहोपाध्याय हरिहरशास्त्रिणा-

मन्तेवासिना वेदान्तविभूषणेन शास्त्ररत्ना-

करेण कृष्णतटाकाभिजनेन

कृष्णशास्त्रिणा

विरचिता ।

तेनैवसंशोध्य,

कुंभघोणस्थ श्रीगोपालविलासमुद्रणालये

मुद्रापयित्वा प्रकाशिता च सती

विजयतेतराम् ।

१९२६

ॐ

॥ श्रीशङ्करगुरुभ्यो नमः ॥

# श्रीब्रह्मसूत्रानुगुण्यसिद्धिः ।

यदहंभावमापन्नमहमासीत्सनातनम् ।
तदहंभावमुत्सृज्य सदस्मि ब्रह्मचिद्घनम् ॥१॥

वेदमानैकमेयाय जगज्जन्मादिहेतवे ।
नमश्शिवाय शान्ताय साक्षिणे शास्त्रयोनये ॥२॥

नरहरिरपिपूर्णपूरुषो यस्तदपिच हरिरेव पूर्णरूपः ।
हरिहरमपि तन्तथाविधानं गुरुपरिबृढमानतोऽस्मि नित्यम् ॥

तन्वीचिदेकरसगर्भभरालसाङ्गी सीमन्तिनीश्रुतिशिखानुगुणं विशन्ती
यद्दर्शनांगणमसूत सुतं प्रबोधं तं संततं श्रुतिगुरुम्मुनिमानतोस्मि॥४॥

यद्भाष्यसंभाषणभेषजेन प्रासूतसद्यः प्रतिबोधबोधम् ।
साध्वीश्रुतिश्शङ्करदेशिकेंद्रं भिषक्तमं तं भिषजाम्नतोऽस्मि ॥५॥

श्रीकामकोटिपीठाधीशश्चन्द्रावतंसमध्यक्षम् ।
शङ्करमभिनवमीडे नूतनताटंकचक्रसंक्लृप्त्या ॥६॥

सिद्धेपि वस्तुनि सिषाधयिषाऽवलंबी बुद्धेपितत्वमथतत्रबुभुत्समानः
श्रीचन्द्रशेखरयतींद्रपदेप्रणम्य तच्छासनात्किमपि कौतुकमातनोमि ॥

अद्वैतं शिवमपि बोधयत्यशेषे श्रुत्यन्ते तदनुगुणेऽपि सूत्रजाले ।
तत्रैतद्विमतमिति प्रतारकाणां वाङ्मुद्रां निरचयितुम्ममैषयत्नः ॥८॥

ये वेदान्तपरायणाः परचिदानन्दे निमग्नान्तरा
येषामग्रे सततं बुधा हरिहरध्यानामृताप्लाविताः ।
येऽपि श्रुत्युपदर्शितेन विधिना सन्मार्गसम्पज्जना-
स्तेषामेव पदारविंदरजसा मूर्धाभिषेकं वृणे ॥९॥

शुद्धाद्वैतसभासु पण्डित इति प्रत्तं य इत्थं पदं
धत्ते भारतमण्डलीच महती दत्ते स्म यस्मै पदम् ।
वेदान्तविभूषणाभिधमिमां सिद्धिं विधत्ते परां
कृष्णः कृष्णमुनीन्द्रसूत्रसरणेस्सारानुगुण्यावहाम् ॥१०॥

आरोप्यमेव सकलञ्चिदधिष्ठितञ्चेत्यावेदयंति यदिवेदवचांसिनित्यं ।
आरोप्यमत्रभवतादथदोषमात्रन्तेनाणुमात्रमपिदुष्यति नात्रकिञ्चित् ॥

श्रुतयोऽद्वैतमेवाहुरित्येतड्डिण्डिमायितम् ।
सूत्राण्यपि तथैवेति पटहोऽपि प्रताड्यते ॥१२॥

क्वेदं सूत्रस्य गांभीर्यं क्व मे मन्दतमा मतिः ।
भाष्यकृत्पक्षपातेन ह्यनुवाचयतीह माम् ॥१३॥

दुष्प्रापन्दुर्निरूपं परशिवमनघं सूत्रकृत्सूत्रजालै-
र्निश्शंकमः प्रशान्तम्मुनिरतिकरुणो ग्राहयत्यात्मतत्वम् ।
इत्येवं भाषमाणो दृढतरहृदयग्रन्थिजालं विभिन्दन्
भूयान्निश्श्रेयसे नश्शिवगुरुतनुभूश्शङ्करश्शङ्करार्यः ॥१४॥

सूत्रानुगुण्यसिद्धिस्सुधियश्श्रुतिगोचरीक्रियतां ।
अथचेत्तनुगुणेयं सिद्धं सिध्यत्यभीष्टमस्माकम् ॥१५॥

ॐ अथ 'अथातोब्रह्मजिज्ञासे' ति सूत्रयता भगवता सूत्रकृता ज्ञाधात्वर्थस्येष्यमाणत्वमुपनिबद्धम् । तच्चानुपाधिकं फलस्यैव-

S. V. S. ... SANTHOME, MADRAS

त्यविप्रतिपन्नं । तथाह्याह स्म भगवान् भाष्यकारः ' फलविषयत्वादिच्छाया' इति । अस्तिसाधनविषयिण्यपि सेति चेत्, अस्ति, अथापि नैतदनाभिसन्धि इष्यते कैश्चिदपि । अथात्र फलविषयिण्येव सोपनिबद्धा । न पुनर्धर्मजिज्ञासेव साधनविषयिणीति कुतोऽयन्निश्चय इति चेत् न, असति बाधके फलविषयिण्या एवास्या एष्टव्यत्वात् । धर्मज्ञानन्नफलमित्यत्राविवादात् । अथकथं ज्ञाधात्वर्थः फलं, सुखस्यैव तत्वादितिचेन्न । सएव सुखमित्यावेदनात् । आवेदयन्ति हि वेदान्तास्स एव सुखमिति ' सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दो ब्रह्मेति व्यजानात् । प्रज्ञानं ब्रह्म । भूमैवसुख' मित्येवमादयः । आवेदितं हि तत एव सूत्रकृतापि 'ब्रह्मजिज्ञासे ' ति तस्येष्यमाणत्वोपनिबन्धनेन सुखत्वम् । आवेदितश्च भाष्यकृतापि ' ब्रह्मावगतिर्हि पुरुषार्थ ' इति । आह स्म हि भगवानाचार्यवाचस्पतिरपि 'विगळितनिखिलदुःखानुषंगपरमानंदघनब्रह्मावगतिर्ब्रह्मणस्स्वभाव इति सैव निश्श्रेयसं पुरुषार्थ' इति । तथाच फलात्मकमपि ज्ञानन्तत्तद्विच्छुरणे तत्तदात्मकं भवतीति धर्मात्मकसाधनविच्छुरणे साधनात्मकंभवति । अविच्छुरणे तु ब्रह्मात्मकफलात्मतान्न विजहातीति विवेक्तव्यम् । एवञ्च मुख्यफलसंसूचनम्मुख्यं प्रवृत्त्यङ्गं कृतं भवति ।

ननु विचारप्रतिज्ञार्थं विचार्यसंशयोऽपि सूचनीयः । स कथं ब्रह्मस्वभावावगत्या तदनिवर्तिकया सूचयितुं शक्यः । ब्रह्मविषयिण्येव खलु सा तन्निवर्तिका तं सूचयेदितिचेत् सत्यं । नकेवलं संसारदशायामपि विद्यमाना ब्रह्मस्वभावावगतिः पुरुषार्थः । किन्त्वनावृततत्स्वभावा । अनावरणश्च ब्रह्मविषयिण्यैव तयेति सापि विवक्षिता ज्ञाधातुनैव । सातु ब्रह्मस्वभावावगति संवलिता मनःपरिणामविशेषरूपा ' ब्रह्मण इति कर्मणि षष्ठी । जिज्ञास्यापेक्षत्वाज्जिज्ञासाया ' इति भाष्येण प्रतिपादिता । अनेनैव समासेन यदवरोहादियं ज्ञानपदवाच्याभवति तस्या अपि लाभेन नतदर्थं पृथक्समासान्तर-

मन्वेष्टव्यं भवति । तथाचेक्षत्यधिकरणे भाष्यं । नासाक्षिकासत्त्वञ्च-स्तिर्जानातिनाभिधीयत ' इति । उक्तश्चाभियुक्तै ' रूभयमपि विव-क्षितं, सौत्रपदानामनेकार्थत्वस्यालंकारत्वादिति । अनेकार्थत्वक-थनमपि नसैन्धवादिपदवद्वृत्तिभेदाभिप्रायेण । किन्त्वेकस्यैवार्थस्य विशिष्टात्मना फलित्वं । विशेषणमात्ररूपेण फलत्वमित्यभिप्रायेण । वस्तुतस्तु ब्रह्मस्वभाव एव केवलो ज्ञाधात्वर्थः । न च वृत्तिरपि, अप्रकाशरूपत्वात् सा तु तत्र ज्ञानपदप्रयोगोपाधिः । अत एवाह भगवान्विवरणकारः ' वृत्तौ ज्ञानत्वोपचारादिति ।

ईक्षत्यधिकरणभाष्यन्त्वभ्युपगमवादमात्रेण । अयमभ्युप-गमवादोऽपि स्पष्टीकृतो विवरणे । ' ज्ञानत्वप्रयुक्तञ्जन्मापि विद्यते, न प्रकाशगुणत्वप्रयुक्तमेव, द्रव्यजन्मव्यतिरेके ह्यद्रव्योपाधौ जन्मा-भावस्य प्रदीपादौ दृष्टत्वात् । अत्रापि ज्योतिश्शब्देनात्मनि प्रकाश-गुणस्य जन्माभावनिश्चयात् । नचान्तःकरणेऽपि प्रकाशगुणोदयो-ज्ञानपरिणामः । स्वभावत एव प्रकाशगुणवद्द्रव्यस्यांतःकरणस्यैव विशेषपरिणामस्य ज्ञानत्वाभ्युपगमा ' दिति चैतन्यप्रकाशस्य स्वा-भाविकत्वव्यवस्थापनार्थं प्रकाशगुणत्वेन स्वाश्रयोपाधिजन्मवर्जं जन्माभावस्य साधनावसरे, जन्मवत्वेन पृथग्जनगृहीतं ज्ञानमिति प्रथमं चैतन्यात् पृथक्त्वेनांतःकरणपरिणामविशेष एव ज्ञानमित्युप-पाद्य, ' नच ज्ञानमपि क्वचिज्जन्मवद्दृष्टम् । दृष्टमन्तःकरण इतिचेन्न । ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात् । तस्य च आत्माश्रयत्वात् । अन्तः-करणपरिणामे ज्ञानत्वोपचारादि ' ति चैतन्यस्यैव पश्चाज्ज्ञानत्वव्य-वस्थापनादिति ॥ तत्र वृत्त्युपहितं चैतन्यं ज्ञानं । तदुपलक्षितं तु फलमिति न काप्यनुपपत्तिरिति ॥

अथकथं सिद्धं ब्रह्म साध्यं सुखं स्यात्, कथंवा सर्वानपेक्षं ब्रह्मसाधनानपेक्षान्नित्यासिद्धन्नस्यात्, कथञ्चवा पुनः पुनरभिलष्य-

माणं सुखमपि साध्यमस्यादिति चेत्, कं प्रत्येवमाक्षिपसि, ननु यस्त्वं ब्रह्मैवसुखमिति वदसि तन्त्वां, ननु नाहमेवं वदामि, किन्तु श्रुतिर्ह्येवमुपदिशति, तत्र कथं श्रुतिरेवमाक्षिप्यतां परिच्छिन्नबुद्धिना भवता । यदि साप्येवमाक्षिप्यते तर्ह्यहमप्येवमाक्षिपामि भवन्तमाक्षेप एव प्रणिधानवन्तं किन्नामेदं सुखं, किमर्थंवा पुनःपुनरभिलष्यते, कथमिदं सुखमिति । अथानुपधिकेच्छाविषयस्सुखं । आत्मार्थं पुनःपुनरभिलष्यत इति चेत् न तदेदं सुखं, यतोऽनुपधिकेच्छाविषयत्वमस्य गतं भवत्यात्मार्थमभिलष्यमाणत्वे, नन्वेवं का गतिः । इयमेव ते गतिः । यदनुपधिकेच्छाविषयस्सुखमिति निरुच्याप्यात्मार्थन्तदभिलषद्भिस्तीर्थकारैस्साकं कथं सिद्धं ब्रह्मसुखं स्यादित्याक्षेपं परित्यज्य पलायनम् ।

अतस्स्वसत्तायामसंदिग्धमन्तरेवाव्यभिचरित संवेदनमात्मैव स्यात् सुखमनन्यार्थत्वेन निरुच्यमानं सर्वैरपि तीर्थकारैरस्यमानश्चाब्रह्मस्तंबान्तं करुणबीभत्सादिष्वपि वृत्तिषु ।

अथ कथन्नित्यसिद्धात्मस्वरूपमपि पुनःपुनरभिलष्यत इति चेत् । पृच्छात्मानमेव त्वदीयं, किमेवमभिलष्यसे नित्यसिद्धोऽपि भूयोभूयोजायमान इवेति । अथ सहजानंदसुन्दरोऽप्यनर्थावहविषयव्रातविच्छुरणेनानानन्द इवावभासमानोऽयमात्मा विषयविच्छेदे नवोनव इव जायमानः काममभिलष्यतां भूयोभूयः ।

अथापि कथमन्तरेवानुभूयमानस्यास्य सुखस्य सर्वव्यापि ब्रह्मभाव इति चेन्न । यतः कथंवाऽब्रह्मभावे सुखस्य सुखभावः । 'नाल्पे सुखमस्ती' त्यल्पस्यासुखत्वे, नह्यल्पं सुखं भवति बृहद्धि सुखं भवतीति । अस्तु किमर्थमिदं शास्त्रमारभ्यत इति मन्यते भवान् । विवक्षितार्थ विज्ञानार्थमिति मन्येऽहं । न यतोनविज्ञानमात्राय प्रवर्तयितुं शक्यते लोकः । ननु विज्ञानस्य फलार्थत्वात्तत्र शक्यते

प्रवर्तयितुं फलाभिलाषीलोकः । न यतोऽन्येषामेवाचार्याणामयं प्रकारः । नत्वस्याप्यागमाचार्यस्यायमेव प्रकारः । अयंतु वेदान्तवाक्यार्थ विचारणाध्यवसान निर्वृत्तं ब्रह्मावगमं ब्रह्मणस्स्वभावं साक्षादेव निश्श्रेयसं पुरुषार्थमुररीकृत्यारभते शास्त्रमित्यस्तीदमाचार्यान्तरविलक्षणमस्मद्बादरायणाचार्यस्य लक्षणमिति ।

अथ येनविषयविच्छुरणेन नित्यसिद्धब्रह्मात्मभूतमपि सुखं पुनःपुनःरभिलषितं भवति तदिदानीं किं रूपमिति जिज्ञासितं भवति । तत्र विच्छुरणन्नाम मिश्रणम्, एकलोलीभावः, मिथुनीभाव इति यावत् । सच चित्वेनैव, नैवानन्दत्वेन , विषयाविच्छुरितायाः एव चित आनन्दत्वात् । स चाध्यासिक एव, प्रकाशस्य प्रकाश्येन तात्विकमिथुनीभावायोगात् । नन्वस्त्यनाध्यासिकस्संयोगादिरिति चेन्न । तस्य प्रकाश्य प्रकाशनाप्रयोजकत्वात् । आवारकस्यैवावार्यावरणाय प्रकाशकस्यापि प्रकाश्यप्रकाशनाय तादात्म्यस्यैवेष्टव्यत्वात् । तस्यच तयोराध्यासिकत्वावश्यंभावात् ।

तथाहि—आवार्यं हि घटादिकमावारकस्य तमसोयोगे तदात्मतामापद्यत इत्यनुभवसिद्धं । अन्यथेदं तम इति वदयं घट इत्यपि प्रकाशापत्तेः । एवं प्रकाशकयोगेऽपीत्यकामेनाप्यंगीकार्यम् । अस्ति संयोगोपीति चेत् । अस्तु संयुक्तयोरेव तयोस्तादिति सोऽपि । अथापि तादात्म्यमप्युपेयमेव । अन्यथा पटसंयोगेऽपिघटस्याप्रकाशापत्तेः । ननु यदवच्छेदेन पटसंयोगो भवत्येव तदवच्छेदेनाप्रकाशः । सर्वावच्छेदेन संयोगे तु भवति घटस्यैवाप्रकाश इति चेन्न । अव्यवधायकत्वात् । येतु संबन्धमात्रेणावृण्वन्ति ते व्यवधायका एव संतआवृण्वन्ति घटादिकं पटकुड्यादयः, असंयुक्ता अप्यन्तराळस्थाः । इदंतु नान्तराळस्थं सदावृणोति, यतोऽन्धन्तमसावृतेऽपि मध्यांगणे प्रदीपप्रकाशितानन्तरांगणस्थमध्यक्षमनुभवति प्रथमांगणस्थो लोकः।

अतस्संयुज्य स्वतादात्म्यमापाद्यैवावृणोतीदं घटादिकं तमः । अत एव तत्र व्यवधायकापाकरण एव यत्न आस्थेयो, नाधिकः, अत्र त्विदमपाकृत्य प्रकाशतादात्म्य संपत्तयेऽपि प्रदीपकरणेनेत्यतत् पटभाष्ये स्पष्टं । एवञ्च सदा तमसा प्रकाशेन वान्यतरेण तादात्म्यमापन्नमेव वर्तते घटादिकं, एवमेवाज्ञानेन ज्ञानेनवान्यतरेणेति विज्ञेयं । इदञ्चान्यस्यान्यतादात्म्यमाध्यासिकमेवेत्यभ्युपेयम् । विषयोऽपिच यदि स्वयं सन् स्यात्तदा कदापि वर्तेतान्यतरनिरपेक्षं, तदभावान्न सन्निति सोप्यध्यस्त एवेति । ननु, न प्रकाशः प्रकाश्यप्रकाशनार्थं प्रकाश्यात्माभवति । किन्तु तं प्रकाशयतीति चेन्न । तं प्रकाशयतीति चेत् किंकरोति, किं केवलन्तेन संयुनक्ति । उत तेन संयुज्य तत्र प्रकाशमाधत्ते नाद्यः । किमर्थं स तेन संयुनक्तीति वक्तव्यम् । तस्यापि प्रकाशायेति चेन्न । स्वयमप्रकाशमानोघटः कथं प्रकाशसंयोगमात्रेणैव प्रकाशेत, यदि प्रकाशेत, पटादिसंयोगमात्रेणापि प्रकाशेत । नच तमो विदारणार्थं प्रकाशसंयोग एवापेक्ष्यते । तस्यैव तद्धेतुत्वादितिवाच्यम् । विदारिते तमसि कथं घटः प्रकाशत इति वक्तव्यं । स्वयमेवेतिचेन्न, स्वयमेव प्रकाशमाने तस्मिन् पूर्वन्तमोयोगायोगात् । न हि प्रदीपस्तमसावृतो भवति । न द्वितीयः । किं घटादौ प्रकाशमादधानोयं सौरप्रकाशस्तत्र स्वान्यमेव प्रकाशमाधत्ते । उत स्वयमेव तन्निष्ठः प्रकाशते । नान्त्यः । घटनिष्ठत्वेन प्रकाशमाने प्रकाशे घटस्य किं भवति । सकथं प्रकाशेत, प्रकाशःखलु प्रकाशेत ।

नाद्यः । ससौरप्रकाशाहितः प्रकाशस्स्वयं प्रकाशते वा नवा । नाद्यः घटे द्विगुणप्रकाशापत्तेः । किञ्चायं प्रकाशस्स्वात्मनैव प्रकाशते । किं घटात्मनापि प्रकाशते । नाद्यः । पूर्वदोषापत्तेः । यदि प्रकाश्यात्मनापि प्रकाशते तदा ससौरप्रकाश एव तथा प्रकाशतां, किं मध्येऽनेन प्रकाशेन । नान्त्यः । स्वयमप्रकाशमानस्सप्रकाशः कथमन्यं प्रकाशयेत् ।

ससौरप्रकाशाहितो घटप्रकाशस्स्वयं प्रकाशमानो घटमपि प्रकाशयतीति भावोच: । यतस्तं प्रकाशयतीति चेत्, किं करोति, किं केवलं तेन संयुनक्ति । उत तेन संयुज्य तत्र प्रकाशान्तरमाधत्त इत्यादिका चर्चापिशाचिका तत्रापि प्रसरेत् । तस्मात् प्रकाशस्स्वेन रूपेणेव घटादि प्रकाश्यात्मनाऽपि प्रकाशत इति सिद्धम् ।

न च विनापि घटं सतथा प्रकाशतामिति वाच्यम् । स्वत-श्शुद्धे प्रकाशे तद्विच्छुरणार्थं तस्याप्यपेक्षितत्वात् । नचैवं सौत्रांतिक-मतापत्तिरिति वाच्यम् । भावानवबोधात् । नहि भावोऽवबुद्धोस्माकं भवता देवानां प्रियेण । न हि वयं सौत्रांतिक इव प्रकाशे प्रकाश्य प्रतिबिंबमभ्युपगच्छामः । येन नित्यानुमेयतां घटस्यापादयेम तेन सौत्रांतिकतामप्यात्मनः प्रसञ्जयेम । किंतु प्रकाश्येन प्रकाशस्य ता-दात्म्यं. तेन तस्यापि प्रकाशम् ।

नन्विदमबुद्धिपूर्वकमेवेति वक्तव्यम् । केनचिदग्रहणेपि स-त्वात् । चेत् किं, तच्च गुणिनि गुणस्य क्रियावति तस्याजातेर्व्यक्तौ च तथ्यमेव दृष्टमिति कथमिदमतात्विकमिति चेत् ।

इदमप्यबुद्धिपूर्वकमेव ते चोद्यं । यतोऽबुद्धिपूर्वकमेव जायमानं केनचिदग्रहणेऽपि वर्तमानमथापि कल्पितमेव पश्यामस्स्फटिके वय-मारुण्यमागन्तुकम् । वक्ष्यति चेदन्निर्विषयाधिकरणे एकस्यैवात्मन-स्संराध्य संराधकभावोपपादनाय ग्रथिते न 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्चकर्मण्यभ्यासादिति सूत्रकारः । तस्य ह्ययमर्थः । यथा प्रका-शादेस्स्वतोऽवैशेष्यं विशेषाभावः । अथच, कर्मणि स्वव्याप्तेः कर्म-तयोपाधावंगुळिकरकोदकादौ सविशेषा इवावभासन्ते प्रका-शादयः । एवमात्मापि कुत एतदेवं अभ्यासात् सर्वत्र वेदान्तेष्वेक-त्वाभ्यासादिति । तथाच प्रकाशस्य प्रकाश्येन तादात्म्ये भवति, पारमर्षमेत्र सूत्रं प्रमाणमिति । ननु तमो न घटादि तादात्म्यमापद्यते येन स्वेनैव रूपेणावभासते, प्रकाशवन्नघटात्मनापीति चेत् । अहो

श्लाघनीयप्रज्ञोऽसि । किमर्थन्तमोघटादेस्स्वतादात्म्यमापादयति तदप्रकाशायेति चेत्, तर्हि घटात्मतामापन्नमपि तमो न तदात्मना प्रकाशेतेति कुतोनावधारितं भवता । प्रकाशस्तु प्रकाश्यप्रकाशनाय तदात्मतामापद्यत इति सोऽपि प्रकाशत इत्यवश्यमवर्जनीयन्तमः प्रकाशयोस्तद्विषययोश्च परस्परमाध्यासिकंतादात्म्यं । एवमेवाज्ञान- चैतन्ययोरपीति स्वयमह्रस्वोपि ह्रस्वइवावक्रोऽपि वक्रइवास्थूलोऽपि स्थूलइवचावभासतेऽयञ्चिन्मात्रोब्रह्मात्मेति सिद्धम् ।

अत्रायन्निष्कर्षः— तमःप्रकाशौ सममेवस्वविषयेषु स्वतादात्म्यमर्पयतः, तेतु तमस्यविविक्ताकारन्तेजसि विविक्ताकारञ्च स्वस्त्रीयन्तादात्म्यमर्पयन्ति । तत्रच तयोस्स्वभावभेदएव हेतुः, एवमेव ज्ञानाज्ञानयोरपीति । सर्वञ्चेदमभिप्रेत्यैवोपवर्णयांबभूव भगवान्भाष्यकारो 'युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवदि' ति । यूयमिति प्रत्ययस्य वयमितिप्रत्ययस्यच गोचरयोरित्यर्थः । तत्र प्रत्ययस्य प्रत्ययिनश्च प्रत्याय्यवशादेव नानात्वं प्रत्ययित्वञ्च प्रत्ययिन इति ध्वनयितुं प्रत्ययाकारप्रदर्शने प्रथमं बहुत्वेन प्रत्याय्यस्यग्रहणं युष्मदिति, ततस्तत्प्रयुक्तबहुत्वेन प्रत्ययिनोऽस्मदिति । गोचरस्येत्येकत्वोपादानंतु, प्रत्ययात्पूर्वं प्रत्याय्यानामज्ञानान्धतमसताद्रूप्येणैकध्यं, प्रत्ययिनांतुस्वरूपतश्च तत्प्रत्याययति यथाघटादीनान्तमस्यैकध्यं, प्रकाशेप्रविभागावभासः, प्रकाशस्यच तद्वशादिति ॥ जिज्ञासाचापाततोऽपि ब्रह्मात्मनि नित्यत्वमनात्मनिच तुच्छत्वमविवेचयतोऽविरक्तस्यानुपरतबाह्यान्तःकरणस्यानर्थव्राताद्प्रमुमुक्षोश्च नसंभवतीति विवेकादिसाधनचतुष्टयसंपन्नएवात्राधिकरोतीत्यथशब्देन सूच्यते । तथाहि । ब्रह्मजिज्ञासेत्यनेन तद्विजिज्ञासस्वेत्येतद्विन्यासससामर्थ्येन तत्सजातीयञ्चार्थसामर्थ्येन सूच्यते श्रुतिवाक्यम् । तत्रार्थसामर्थ्यसंभूचितवाक्यघटितप्रकरणेन यस्मिन्सति भवन्ती भवति ब्रह्मजिज्ञासेति न्यायेनचाथ-

मधिकारस्सूच्यते । सचाथशब्देन स्वार्थानंतर्यप्रतियोगितयापेक्ष्यत इति तेन सूच्यते । अथातश्शब्दार्थः कोहेतुः कुत्रेति जिज्ञासितंभवति । तत्रयस्माद्वेदएवकर्मणोऽनित्यफलतां ब्रह्मविद्यायाश्चपरमपुरुषार्थसाधनतां दर्शयति । ततोहेतोरिति भाष्याल्लभ्यते । ततः कुत्रेति परं जिज्ञासितव्यम् । नन्वधिकारब्रह्मजिज्ञासयोरन्यतरस्मिन् स्यात्तदभ्यस्याप्रसक्तेः । न ब्रह्मजिज्ञासायां, सत्यधिकारे तस्यावश्यंभावात् एवं तर्हि, अधिकारमेवाक्षिपति, कः वेदेन वैदिकः । कथमिदंविज्ञायते । वेदएवेति भाष्यस्वारस्यात् । अथाधिकाराक्षेपद्वारा किमाक्षिप्यते । ब्रह्मजिज्ञासा, न । यतोऽधिकारसंपन्न एव ब्रह्म जिज्ञासेत सकथमधिकारासंभवान्न ब्रह्मजिज्ञासितव्यमिति प्रतिषेद्धुं शक्येतेति। अस्तु तर्हि प्रतिषेध्या वेदान्तवाक्यमीमांसा सूत्रकारीया, नेयमारंभणीयाऽधिकारासंभवादिति । युज्यतेतराम् । अतएवनेदं सूत्राक्षरार्थसंबंधिनीं विनेयानामाशंकामपाकर्तुं, प्रयुक्तमतःपदं । अधिकारिणामेव विनेयत्वात्तत्रतेषामाशंकाऽयोगात् । किन्तु कश्चिदाक्षिपति कर्ममीमांसको वेदेन वेदांतवाक्यमीमांसां सूत्रकारीयामार्थिकीं, कुतोऽयमधिकारः, कावा ब्रह्मजिज्ञासा, तत्र कथंवाऽरभ्यते वेदांतवाक्यमीमांसेति, कथमेवमिदानीमाक्षिप्यतां, केनेदानीं स्पष्टमुक्तं वेदांतवाक्यैरेव मीमांस्यते ब्रह्मेति, उपरिहिवक्ष्यति 'शास्त्रयोनित्वादि' तीत्युदासीनइवाननुभाष्यतदाक्षेपं, तमिमन्तेनैवशातयति क्रुध्यन्निवसूत्रकारोऽतइतीत्येवमिव व्याचकार भाष्यकारो 'यस्माद्वेदएवेति'॥ इममेवार्थं स्पष्टमाचष्टेच भामती ।

एवं प्राप्ते— आह भगवान् सूत्रकारः । तस्यार्थमाचष्टे भाष्यकारइति पृथङ्नामद्वयग्रहणेन, भगवानित्याक्षेपानर्हत्वप्रतिक्षेपसमर्थत्वयोस्सूचनेन च । एवञ्च नास्त्यैकशास्त्याशंकागन्धोऽपीतिलभ्यते अत्र 'पूर्वप्रकृतापेक्षायाश्च फलतआनन्तर्याव्यतिरेकादिति भाष्यं दृश्यते, तस्यचायमर्थः । अस्ति पूर्वप्रकृतसापेक्षार्थांतरपरोऽप्यथ

शब्दः । तत्रार्थांतरं द्विविधं, व्यवहारेपरंस्वापेक्षितस्यार्थस्यपूर्वं प्रकृतत्वमपेक्षमाणमेकं, अर्थवशतोऽपि तस्यतदपेक्षमाणमपरञ्चेति, अपेक्षाप्याद्याविरोधगर्भा । अपरातु हेतुभावगर्भा । तत्र पृथिवीनित्या, अथानित्येत्याद्योऽथशब्दः । अस्यायमर्थः । अथ– यदि नित्यान, नित्यविरुद्धाचेदिति । तदाऽनित्यावेति वाक्यार्थसमाप्तिः । तथाचायमथशब्दः पूर्वप्रकृतत्वेन नित्यत्वमपेक्ष्यतद्विरुद्धत्वेनानित्यत्वरूपमर्थांतरमुपादाय तद्रूत्वेन पृथिवीपरोभवति । अनित्यपदन्तु तत्वेन तदादायतत्परोभवतीति न पौनरुक्त्यं । एवञ्चायं विकल्पार्थक इति व्यवहारएव प्रवर्तते । नत्वन्यत्र । न हि पृथिव्यामनित्यत्वंतत्र पूर्वन्नित्यत्वमपेक्ष्य जायते । वर्ततेवा । अतो यत्रापेक्षितस्य पूर्वमुपन्यासस्तत्रैवास्यप्रयोग इति नात्रस्थाथशब्दोऽयमथशब्दः । तदभावात् । द्वितीयस्तु, ‘ जायामेस्यात् । अथ प्रजायेय, वित्तंमेस्यात्, अथ कर्मकुर्वीये ’ ति प्रयुज्यमानः, अस्यतु, अथ, तदा, यदाजाया भवति, वित्तं भवति तदेत्यर्थः । जायावित्तसापेक्षं प्रजनिमाप्नुवानि, कर्माणिच करवाणीति वाक्यार्थः । तथाचायमथशब्दो जायावित्तसापेक्षत्वेन रूपेण प्रभूताञ्जनिं कर्मचाचष्टे, अयमेवात्रभवन् भवेत्, अपेक्षाचात्रहेतुभावगर्भा, कदावाजनिकर्मणीजायावित्ते पूर्वमपेक्षेयातां, ते प्रतितयोर्हेतुभावएवेति । हेतुभावश्च पूर्वमनुपन्यासेऽपि भवति हेतुमन्निष्ठं हेत्वानंतर्यञ्च गर्भीकरोतीति ‘ फलत आनंतर्याव्यतिरेकादि ’ ति भाष्यं संभवति साक्षादेवानंतर्यार्थत्वे किं शिरोवेष्टनेनेत्यभिप्रायकम् । इदमेवोक्तं ‘ तत्र पूर्वं प्रकृतस्ययोयं हेतुभावस्तत् गर्भापेक्षायाः प्रक्रियमाणे, आनंतर्यविषयत्वावश्यंभावेनाथ शब्दस्य पूर्वप्रकृतापेक्षयाऽर्थांतरपरत्वे विषयविवेचनेऽनुज्झितानंतर्यार्थत्वादि ’ ति सिद्धांतसिद्धांजने श्रीकृष्णानंदसरस्वतीभिः ॥

नन्वत्र भवत्यपरिहार्यं पौनरुक्त्यं । प्रक्रियमाणे प्रकृतानंतर्यकथनेनैव प्रकृतासंभवाक्षेपप्रतिक्षेपसूचनसंभवात्, अतएवोक्तं सि-

मुमुक्षा परामृश्यते, ल्यब्लोपेपञ्चमी, मुमुक्षां प्राप्येत्यर्थः । इतीदमा मुमुक्षा परामृश्यते, ल्यब्लोपेपञ्चमी, मुमुक्षां प्राप्येत्यर्थः । इतीदमा विवेकादिमुमुक्षांतस्यानंतर्यप्रतियोगिनस्संभवप्रदर्शनार्थमत इतीति भाष्यादिः ' अत्रवदन्ति । विहितक्रियासामान्ये सामर्थ्यविद्वत्वादिकमधिकारः, काम्येतु विहिते विशिष्यकामनाऽधिकारः, तथाच काम्येऽत्र ब्रह्मविचारे मुमुक्षैवाधिकारइति प्रयोजकस्य विवेकादेः प्रयोज्यया मुमुक्षया सहानंतर्यप्रतियोगितयोक्तिरयुक्ता, विचारे साधनचतुष्टयानंतर्योक्त्यैवतत्संभवस्यापि लाभादतःपदवैयर्थ्यञ्चेति, मत्पक्षेतु नकोप्ययंदोषइतीति चेत् । अत्रोच्यते । अहह केयंप्रथमसूत्रएवैषां भाष्यभामत्यादिविरुद्धा पदार्थविवरणप्रणालिका । कथमत्रसूत्रकारोऽनतिप्रचुरप्रयोगां ल्यब्लोपेपञ्चमीं प्रथमत एव प्रयुञ्जीत । कोहि नामजानीयात् सूत्रभाष्यकारयोर्हृदयम् । तावेव परस्परं विजानीयातां, यथा शिवस्यहृदयं विष्णुर्विष्णोश्चहृदयं शिवः इदमत्रप्रथमंविवेचनीयं, कीदृशेनाभिप्रायेणेदं शास्त्रमारब्धमिति, एवं किल विज्ञायते परमर्षेरभिप्रायस्य धोरणी । यथाकिल । अहोनुखलु कष्टं हीदं वर्तते। यत्किल । अनवरतं ह्यनर्थमेवार्थमध्रुवमेवच ध्रुवमाभिमभिमन्यमानो बंभ्रमीति ब्रह्मादिस्तंबान्तोयं जन्तुः । न च कटाक्षेणापि किञ्चिदीक्षते सकृदपि परमार्थसन्तमात्मानं प्रत्यंचं । तथाहि यदाहि किल किञ्चिद्रामणीयकमिव पश्यत्ययं लोकः, स तदैवतद्ध्रुवमेवाभिमन्यते, ततस्सञ्चोरज्यति तत्र, अनुक्षणमेवचकरणैरभिव्याप्नोति तत्, अन्वेवसज्जति सुदृढं, अनुभवतिच ततोऽर्थमनर्थंवाऽदृष्टवशं, एवमेवपुनःपुनः परिभ्रमन् श्रांतस्स्वपिति षड्राममिमञ्चक्रमाधिरूढः, पुनरप्युद्बुध्यते, पुनरपि श्रांतस्स्वपितीति । यदातुकिलैवं स्वभावाद्विनिवर्तते तदैवास्यजन्तोरेतस्मात् षडराचक्रादवरूढस्य भवेदात्यंतिकं स्वास्थ्यम् । ततोऽस्मादवश्यमवरोहयितव्योयंजन्तुः, तदर्थमयमुद्बोधनीय इत्यमर्त्यञ्चाधिकं स्तुवन्ती मर्त्यञ्च नित्यान्निदन्ती

प्रवृत्ते श्रुत्यन्तसुन्दरीयं । तदवश्यंच केचिन्निवर्तेरन् स्वाभाविकादपि विषयेषु परिभ्रमणादैवादपि विकुण्ठितमनोरथा अवरोपित संपत्का आरोपितविपत्काश्च । तएते श्रुत्यन्तमवलंबेरन्, तस्यच यथावदर्थम् प्रतिपद्येरन्, वादिभिरप्याक्षिप्येरन् । अन्यथाच गृहं तोऽनर्थव्रातमपिलभेरन्, अतोवश्यमेतेऽनुकंपनीया मया वेदाचार्येण वेदांततत्वावबोधनेनेति । तत्रेदमुक्तं येस्वाभाविकलोकविपरीताविवेकादिमुमुक्षांतसाधनसंपन्नास्तैरियं ब्रह्मजिज्ञासाभवति कर्तव्या, तैरेवकर्तव्या, इयमेवकर्तव्येति । तत्रयोयं सिद्धांतमुक्तावलीकारपरिष्कारस्तस्येदमुच्यते सदृशमुत्तरम् । यदिदमुक्तं काम्यो मोक्षः । कामिनात्राधिकारः काम्यमेवमोक्षसाधनं ज्ञानं । तत्साधनंच श्रवणादिकमिति तदिदंसुष्टूक्तं, नचैवमुक्तवतेत्थं व्याख्यातुं युक्तं कामनां प्राप्यकाम्यसाधनं कर्तव्यमिति । नहीदं कामयित्वेदं कर्तव्यमिति विधीयते कुत्रापि, किंतु यदीदं कामयसे तर्हीदं कर्तव्यमिति विधीयतेसर्वत्र । न हि ज्योतिष्टोमेन यष्टव्यं स्वर्गं कामयित्वेत्यास्तिविधिः । किंतु स्वर्गं कामयमानेन यष्टव्यंज्योतिष्टोमेनेत्यास्ति विधिः, अहह नित्यमपि यदि जिजीविषासि तदाहोतव्यमितिहि विधीयते विधिना । किंतु होतव्यमेवेत्यधिकन्निवेश्यते नित्यत्वाज्जिजीविषायाः । तत्रकथंमुमुक्षां प्राप्येदं श्रोतव्यमिति विधीयतां सूत्रकृता, व्याख्यायतां वा तथाभवता । अतस्संपन्नमुमुक्षांतस्स्वयं जिज्ञासते ब्रह्म, तदर्थमिदं शास्त्रमारभ्यते भगवता बादरायणेन प्रतिक्षिप्याक्षेप्तारमत इति । न च मुमुक्षानंतर्यमेवास्त्वथ शब्दार्थ इति वाच्यम् । सूत्रकारभाष्यकारयोरनिष्टेः । अथकोवाशयोऽनयोरिति चेत् । इदमुच्यते । नतावद्विवेकादिमुमुक्षांतास्सकृदेव सर्वात्मना निष्पन्नास्सन्तो निष्पादयन्त्युत्तरोत्तरं । येनमुमुक्षानंतर्यमेव वक्तव्यं स्यात् । किंतु प्रथममापाततो जायमानाः परस्परावष्टंभेन चिरकालाद्भवंति संपन्नाः, तत्र योऽयंविवेकस्सम्यगाकारो ध्रुवमिदमध्रुवमिदमिति । तत्र चरमोऽध्रुवा-

दिच्छामवरोहयति । प्रथमस्तु ध्रुवेतामारोहयति । तामेवविषयैषणा-
मनुजायमानो नयनादीनिच करणानि तेषु व्यापारयंस्समनुचवर्धमान-
स्ततेष्वेव परिभ्रमणरूपोयोयं मनसः परिणामविशेषस्तस्योपरमएव
शमइति संकीर्त्यतेदमादिहेतुर्विवेकावष्टंभोऽपि तस्योपष्टंभो मुमुक्षा-
सलिलाबासिक्तविरक्तताबीजांकुरः । तथाच विवेकचूडामणिः ।
‘एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः । मरौ सलिलवत्तत्र शमा-
देर्भानमात्रते ’ ति । अयमितरावष्टंभोपि सर्वोपष्टंभोज्ञानोपायेषु
यथास्यपरिपंथीपतनसाधनेषु । तथाहि व्यासः‘ बलवानिन्द्रिय-
ग्रामोविद्वांसमपि कर्षति । शमदमाद्युपेतस्स्यात्तथापित्विति ’
तथाचैकतुलामधिरूढा एवैते भवन्ति ज्ञानोपायाः । अनुवर्त-
नीयाश्च मोक्षांतम्नतु मध्येसन्यसनीयाः कर्माणीवेति विज्ञायते सूत्र-
भाष्यकारयोरादरातिशयोत्र सममेवसर्वेष्विति । इतरथाऽथ मुमुक्षा
नन्तरं ब्रह्मजिज्ञासेत्येव वक्तव्यमिति व्यर्थं भवदीयएव पक्षेऽतःपद-
मयुक्तश्च त्रिवेकादित्रयानंतरमिति भवदीयं विवरणमिति किं स्व-
यूथकलहेन । इत्थं सूत्रानुगुणे सत्यपिभाष्येऽति गंभीरे । सिद्धं
वेदांतोक्तमस्यात् व्युत्पत्तिराहित्यात् । इत्याक्षेपेसिद्धेऽप्यस्ति व्युत्प-
त्तिरित्यतःकार्या । ब्रह्मणि जिज्ञासेति व्याकुर्वन्तिस्म लक्ष्मणा-
चार्याः । तत्र, मतप्राबल्यदौर्बल्ये पूर्वाचार्यैर्विवेचिते । सूत्रानुगुण्यं
कस्येति परमत्रविविच्यते । अस्ति हि शास्त्रादावनुबंधचतुष्टयं सा-
ध्यत इति शास्त्रकृतां मर्यादा । साच त्यक्तेति भवति महान्दोषएषां।
नच तदपि शब्दादेवप्रतीयत इति नायंदोषएषामिति वाच्यं । त-
स्यैव संभवासंभवविवेचनेन प्रधानतस्साधनस्य सांप्रदायिकत्वात् ।
विचारासंभवाशंकापेक्षया तदभ्युपगम्य तस्य शास्त्रप्रतिपाद्यत्वाक्षे-
पस्याल्पीयस्त्वात् । सांख्यादितंत्रवदनुमानमेवोपनिबध्यत इत्यने-
नापि समाधेयस्यास्याक्षेपस्याकिंचित्करत्वात् । सामान्यतोविचार।
प्रतिज्ञायां वेदान्तैस्सेति कृत्वाऽऽक्षेपस्यहठात्कारायितत्वात् । शास्त्र-

योनित्वप्रतिज्ञासत्वे तदनंतरमेवायमाक्षेपोन्यास्य इत्यस्य सर्वसंमतत्वसंभवात् । एकेनैवसमन्वयसूत्रेण सर्वविधस्यापि शास्त्रवेद्यत्वाक्षेपस्य प्रतिक्षेपसंभवे पृथक्पृथक्तत्र सूत्रविनियोगकरणस्य बालिशचेष्टितायमानत्वात् । तत्पुनर्ब्रह्मप्रसिद्धमप्रसिद्धंवेति विकल्पस्य सर्वात्मनाप्याक्षिप्य समाधायके सत्यपि भाष्ये, एवंविधदोषगणग्राहग्रसनीयस्याधिकरणविरचनस्य भाष्यविद्वेषैकमूलकत्वाच्च ॥

वृत्तात्कर्माधिगमादनंतरन्तत एव हेतोर्ब्रह्मविविदिषेत्यथातश्शब्दौ च विवृण्वन्ति । तत्राथशब्देन वर्तिष्यमाणस्य वृत्तादानंतर्येऽतश्शब्देन वृत्तस्यवर्तिष्यमाणहेतुत्वेवा प्रतिपादितेऽर्थसिद्धमितरदिति भवत्यन्यतरनैरर्थक्यं । विवृतश्चेदन्नैरर्थक्यं सिद्धान्तसिद्धाञ्जने ॥ किञ्च कोयंकर्माधिगमोनाम । यदनंतरभाविनी ब्रह्मविविदिषा । किं पूर्वतंत्रविचारणासाध्यः, उताधीतसांगसशिरस्कवेदस्याल्पास्थिरफलं कर्मेति स्वतएव जायमानः । नतावदाद्यः । साकिं साक्षादेवोपयुज्यते । आहोतदंगकर्मानुष्ठापकतया । नाद्यः । कर्मणैव निरतिशयं सुस्थिरञ्चफलं प्रतिपादयता पूर्वतंत्रेण निर्वृत्तः कर्माधिगमः कथं साक्षाद्ब्रह्मविविदिषाहेतुस्स्यात् । कथंवा 'शेषत्वात् पुरुषार्थवाद' इति विवदमानेन मुनिना विरचितं तंत्रं कर्मणैव तादृशं फलन्नाधिगमयेत् । नच द्वितीयः, ऊर्ध्वरेतस्स्वग्नींधनाद्यनपेक्षाविद्या । ग्रहस्थेषु सर्वापेक्षा । सर्वत्रशमाद्यपेक्षेत्युपेयता भवता सर्वाधिकारिसाधारणं शमाद्यानंतर्यस्यैवावश्याभ्युपेतव्यत्वात् । किञ्च निरतिशयं फलं प्रयच्छति कर्मेति विजानता सता विहितं कर्म तत्र कथं विरागताहेतुस्स्यात् । तत्र कुतो वातस्य शमादिः । कुतश्चवाब्रह्मविविदिषेति । नापि चरमः । अल्पास्थिरफलं कर्मेति विजानतो विविदिषेत्युक्तौ तत्रविरक्तस्य सेत्युक्तं भवति । तत्र सर्वाधिकारि साधारणं वैराग्याद्यानन्तरं विविदिषेत्येव वक्तुमुचितं लाघवादिति नकर्माधिगमानंतर्यमथशब्दार्थः । अस्माकंतु न ब्रह्म

विविदिषाहेत्वर्थमतःपदं । किंतु वेदांतवाक्यमीमांसारंभहेत्वर्थमिति न पौनरुक्त्यमिति ।

इत्थमतिदुष्टमर्थं प्रतिपाद्याप्ययमतान्तरं सर्वं । विद्वेषमात्रहेतोर्नीताशंकं विदूषयन्त्येते ॥ उक्तंचेदं श्रीकृष्णानन्दसरस्वतीभिः । 'अहोपरविद्वेषव्यसनिता तान्त्रिकहतकस्य । यस्स्वार्थोपपत्तिनिरपेक्षं परार्थविघातायैव प्रणिधत्त' इति । एवं किल विदूषयन्त्येते । ननु, वाक्यार्थज्ञानानंतरमेव शरीरपातस्स्यात् । नचानादिवासनया मात्रया भेदज्ञानमनुवर्तत इति भवता शक्यते वक्तुम् । वासनाया अपि-मिथ्यात्वेन ज्ञानेन निवृत्तत्वात् । वासनाकार्यं भेदज्ञानं छिन्नमूलमथ-चानुवर्तत इति बालिशभाषितमिति ॥

वयमत्रवदामः । किमेवं विदूषयन्ति सूत्रकारीयम्मतं । यतस्स-एववक्ष्यति । 'भोगेनत्वितरेक्षपयित्वा संपद्यत' इति । ननु निष्प-न्नोपासनविषयं हि तत् । नहि निवृत्ताविद्याविषयमितिचेत् । कदा वेदमुपासनान्निष्पद्यते । सांपराये । उतांतराळएव । यदि सांपराये युक्तश्चैतत्, आप्रायणादुपासनविधानात् । 'सांपराय' इति तदा-नीमेवोपासनकार्यस्याघनिर्हरणस्य निर्धारणाच्च । तत्रकेन कस्य कदाभोगेन क्षपणं कर्तव्यं भवन्मते । अथान्तराळएव । सांपरायइति तु नतदानीमेवाघनिर्हरणपरम् । किंतु व्यध्वनितदभावपरम् । आप्रा-यणादित्यपि नतावत्पर्यन्तमुपासनाविधानपरम् । किंतूपास्यसौंदार्य-वर्जितहृदयेनोपासकेन क्रियमाणोपासनज्ञापनपरं । अतोऽन्त्येवोपा-सकस्याप्यारब्धं कर्मेति चेत् न । एवन्तर्हि यथा निष्पन्नमुपासनं सत्य-त्वेऽपि सर्वेषामारब्धवर्जमेव कर्मविनाशयत्येवमेव मिथ्यात्वेपि तद्वर्ज-मेव तद्विनाशयतिज्ञानमित्यत्र कः प्रद्वेषोभवताम् । वस्तुतस्तु नायं पक्षस्तत्र साधीयान् । यद्यंतराळएवनिष्पन्नमुपासनन्नष्टंच तेनानार-ब्धं, तदाऽरब्धं परंभोगेन क्षपयितव्यमुपासकेन । नचाप्रायणादुपा-सनममि कर्तव्यम् । नचस्वयमेवानुवर्तत इति वाच्यम् । भोगानवसर-

प्रसंगात् । नच प्रारब्धेन प्रत्याविततो भोगमनुभवतीति वाच्यम् । ततः प्रयत्नपूर्वकमुपासनप्रवृत्त्यनुपपत्तेः । नच चिरसमयवासनया प्रवृत्तिरुपपद्यत इति वाच्यम् । परानुग्रहनिग्रहव्यतिरेकेण तत्र वासना या एवासम्मतेः । नच परएव तत्र प्रेरयतीति वाच्यम् । तस्य तथा प्रेरणस्य निष्प्रयोजनत्वात् । नच तावन्तं कालं सुकृतदुष्कृता-स्पर्शः फलमिति वाच्यम् । तदधिगमात् परं प्रमादेन कृतमप्यघं पर-स्सहतइति तदधिगमसूत्रं व्याकरिष्यता भवतेत्थं वक्तुमशक्यत्वात् । किंच तदधिगमानुक्षणमेव परिपूर्णानुग्रहेण परेण यथा पुनरप्युपासना-यासो न स्यात्, यथावा प्रमादेनाप्यघसंस्पर्शो न स्यात्, यथाचवा प्रारब्धदुःखानुभवोऽपि न स्यात्तथा सद्य एव नेतव्यः परमं पदं विद्वानिति तत्रैव सद्यश्शरीरपातेन भवितव्यम् । अपिचोपास्यसौन्द-र्यावर्जितहृदयस्य परमपदेऽपि जक्षणादिषु नक्षणावहश्चित्तमिति भोगसाम्याभावप्रसङ्गश्चेति, अस्मत्पक्षोपपत्तिस्तु तत्रैव सूत्रे प्रपञ्च-यिष्यते ॥

यत्तु द्विचन्द्रज्ञाने बाधकसन्निधानेऽपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानाबाध्यत्वेनाविनष्टत्वान्मिथ्याज्ञानानु-वृत्तिरविरुद्धा । प्रबलप्रमाणबाधितत्वेन भेदज्ञानानुवृत्तिर्विरुद्धैवेति तत्तुच्छम् । सति बाधके चन्द्रैकत्वाज्ञानस्य निवृत्त्यभ्युपगमात् । तथाचयथा तिमिरादिदोषसमसमये सत्यपि बाधके चन्द्रैकत्वाज्ञानमेव निवर्त्तते । नच द्विचन्द्रादिज्ञानमपि, तत्तु जायत एव बाधिताकारं ति-मिरादिनिवृत्तौ तु तदपि निश्शेषन्निवर्तते एवमनादिवासनासमस-मये सत्यप्यात्मैकत्वविज्ञाने तदज्ञानमेव निवर्तते । नतु भेदज्ञानमपि तत्तु जायत एव बाधिताकारं वासनानिवृत्तौ तु तदपि निश्शेषन्निवर्तत इति दृष्टान्तदार्ष्टान्तिकयोस्संप्रतिपत्तौ स्वबाधकबाध्यत्वाबाध्यत्वरूपं दोषवैषम्यमकिञ्चित्करं प्राबल्यमपि भेदज्ञाननिवृत्त्यौपयिकं स्वजन्य-पटुतमसंस्कारसाचिव्यं नास्त्येव तदानीमिति कात्रानुपपत्तिरिति ।

येचास्मदीयाज्ञानस्थापनानुमाने प्रतिप्रयोग उपनिबद्धस्तथा-त्रोपक्षिप्य प्रतिक्षिप्यते—अज्ञानं न ज्ञानमात्रब्रह्माश्रयं अज्ञानत्वात् शुक्तिकाज्ञानवत् ज्ञात्राश्रयं हि तदित्येकः प्रयोगः—अत्र ज्ञाना-भावस्य पक्षत्वे सिद्धसाधनं भावरूपस्य तत्वे तु दृष्टान्ते साध्य-विकलता मन्मते शुक्त्यज्ञानस्य ब्रह्माश्रयत्वात्तत्र शुक्तेः केवलम-वच्छेदकत्वात्, उक्तं चाद्वैतसिद्धौ नह्यविद्याकल्पितेऽस्माभिरविद्या-वा तच्छक्तिर्वाऽभ्युपेयत इति। ज्ञात्राश्रयं हि तदिति हठात्कृत्यो-क्तिः। भवताऽज्ञानस्यैवानभ्युपगमात्। मया तु ज्ञात्राश्रयत्वान-भ्युपगमादिति। एवं बहवः प्रयोगाभासा ग्रन्थोदरपूरणार्थमुपनि-बद्धाः। ते तु ग्रन्थविस्तरभयान्न लिख्यन्ते समाहिताश्चाद्वैतसिद्ध्यादा-विति। यत्वन्ते कुबुद्धिकल्पितमिति पृथग्जनेनेव निन्दितम् श्रीभाष्य-कृता तदश्रुतमिव परित्यज्यते--सिद्धमव्युत्पन्नमिति पूर्वपक्षे तस्य सूत्राक्षरेण किमप्युत्तरमदत्वा कर्माधिगमात् परन्तत एव हेतोर्ब्रह्मवि-विदिषेत्येतत्कथं घटेत। आभिप्रायिकस्याक्षेपस्य वाचनिकेन ह्युत्तरेण भवितव्यं। अस्मन्नयेत्वतश्शब्दबलादयमर्थो लभ्यते। यथाकिल-अथ ब्रह्म जिज्ञासते, तत इदमारभ्यत इत्युक्तौ नेदमारम्भणीयं, आमुष्मि-कफलाय हीदमारभ्यते। तत्तु निरतिशयं कर्मणैव लभ्यत इति वेदे-न विज्ञायत इत्याक्षेपे अतः, यस्मात्ततएव वेदात् कर्मणोऽनित्यं फलं ब्रह्मविज्ञानाच्च नित्यं फलं विज्ञायते, अतस्संभवति विशिष्टाधिका-रिणो जिज्ञासा, तत इदमारभ्यत एवेत्येतत् सम्यग्विमृशन्तु पण्डि-तप्रकाण्डा इति ॥

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।
सविशेषं सदा यूयमुपाध्वं तत्र काक्षतिः ॥

स्वप्रकाशं परं ज्योतिः प्रतिक्षेप्तुं न शक्यते।
नह्युलूकः प्रतिक्षेप्तुं शक्नुयाच्चण्डभास्करम् ॥

प्रत्यक्षदृष्टमपिकोनुभवानितित्वांपप्रच्छुरम्बरचराइतियच्छ्रुतोऽसि ।
जिज्ञासितोसिदिविषद्भिरितीतरेषांजिज्ञासितव्यइतिशंकरसाधितोसि

॥ इति जिज्ञासाधिकरणम् ॥

२ जन्माद्यस्ययतः—

अत्र जिज्ञास्यस्य ब्रह्मणो लक्षणप्रमाणजिज्ञासायां सूत्रेण लक्षणं प्रतिपादयन् प्रमाणञ्च सूत्राक्षरविन्यासवैचित्र्येण सूचयतीत्यर्थकं 'ब्रह्मजिज्ञासितव्यमित्युक्तं किं लक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान् सूत्रकार' इति पातनिकाभाष्यम् । तत्र किमिति जिज्ञासायां, लक्षणमिति प्रमाणस्याप्युपलक्षणं । सूत्रकारइति श्रुतिवाक्यमेव सूत्रीकरोति विन्यासवैचित्र्येणेत्यर्थकं अत एवात्रावसाने भाष्यं, तस्माज्जन्मादिसूत्रन्नानुमानोपन्यासार्थं किंतर्हि वेदान्तवाक्यप्रदर्शनार्थमिति । भगवत्पदमपि भगवदंशावतारोऽपान्तरतमानामवेदाचार्योऽयं, अतो वेदान्तमेव प्रमाणराजं सूत्रीकुर्यात् नाप्रतिष्ठितमनुमानमुपन्यस्येत् कपिलादिवदित्यर्थमभिव्यनक्ति । अतएव सिद्धवद्वेदान्त वाक्यकुसुमग्रथनार्थत्वात् सूत्राणामिति भाष्यम् । एवमेव शास्त्रावसानसूत्रावतरणिकायामपि अत उत्तरं भगवान् बादरायणआचार्यः पठत्यनावृत्तिश्शब्दादनावृत्तिश्शब्दादितीति भगवत्पदाचार्यपदघटितं भाष्यं तथा मध्येऽपि पुरुषार्थाधिकरणे तस्मात् पुरुषार्थोऽतश्शब्दादिति भगवतो बादरायणस्य यन्मतं तत्तथैव तिष्ठतीति भाष्यम् । अत्र "यतोवे" त्यादिवाक्यं विन्यासवैचित्र्येण तत्सजातीयञ्च 'यस्सर्वज्ञ' इत्यादिकमर्थसामर्थ्येन संसूचितं, तत्रार्थसामर्थ्य सूचितेन सर्वज्ञत्वञ्चोपक्षिप्तं भवति । यथा पूर्वसूत्रेऽधिकारः, नतु जगत्कारणत्वोपन्यासेन, तस्य केवलप्रकृतिमात्रपरत्वशंकायामुपक्षेपायोगात्, अत एवोत्तराधिकरणे जगत्कारणत्वप्रदर्शनेनेति पातनिकाभाष्यं नतूपन्यासेनेति वेदितव्यं । उपहितपरोऽयं पादः, यदेवोपाधिसंश्लेषविश्लेषाभ्यां विशिष्टश्च शुद्धश्च भवति, द्वितीयस्तुविशिष्टपरः,

रेव सूत्रेणोदाहृता, नानुमानं मयोपन्यस्तमित्युपादिष्टा वेदाचार्येण वीतशंका बभूवुरिति तदर्थमिदमुपदेशात्मकं शास्त्रं निर्वृत्तं । अस्यैव प्रपञ्चश्शास्त्रयोनिकमेव ब्रह्म ब्रह्मैव शास्त्रयोनिकमिति साधयितुं प्रवृत्तमुपर्यधिकरणद्वयं । अत्र स्वतन्त्रसाध्याभाववतो हेतोर्ग्रथनेन न जगत्कारणे स्वातन्त्र्येणानुमानस्य प्रवृत्तिरिति उपक्षिप्तस्य सर्वज्ञत्वस्य दृढीकरणेन शास्त्रानुसारिणी युक्तिरप्यपेक्षितेति च सूचयित्वा सांख्यमप्युत्थापयामास, तदर्थमेव हि सर्वज्ञत्वदृढीकारः । अत एव ईक्षते' रिति मुखत एव हेतूकरिष्यति तत्परीक्षायां ।

इदमेव सूचितमर्थद्वयमनुभाषितं वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः नानुमानादिप्रमाणान्तरनिर्वृत्तेति । श्रुत्यैव च सहायत्वेन तर्कस्याप्यभ्युपेतत्वादिति च । शास्त्रयोनिकत्वप्रतिज्ञया तु कर्ममीमांसकोत्थानं । एवञ्चाथवेति वर्णकान्तरोपक्रमस्थं भाष्यं फलं वा मूलं वेतिवद्ग्रथेच्छामित्यर्थकं वेदितव्यं, एवं च, संभवति तंत्रेण बह्वर्थसाधकत्वे, द्वितीयार्थमात्रपरत्ववर्णनं सूत्रस्य लघुत्वापादकं भवतीति वेदितव्यम् ।

अत्र " ब्रह्म न वेदान्तवेद्यं, तदुक्तस्य जन्मादित्रयहेतुत्वस्य ब्रह्मण्यसंभवादित्याक्षेपे, आह 'जन्माद्यस्यबत इति' श्यामो युवा लोहिताक्षोदेवदत्त इत्यादिवत् समसमयमसंभवेऽपि, विभिन्नकालसंभवात्, भवतीदं लक्षणं ब्रह्मण इति सूत्रार्थः । अत्रोपलक्षणमुपलक्ष्याकारः, पूर्वप्रतिपन्नाकारश्चेति त्रितयमवर्जनीयं । यथा यत्र शरारिरास्ते, तन्मित्रक्षेत्रमित्युक्ते, शरारिरुपलक्षणं, मित्रस्वामिकत्वमुपलक्ष्याकारः, क्षेत्रत्वं पूर्वप्रतिपन्नाकारश्च, एवञ्जन्माद्युपलक्षणं, लक्ष्मीपतित्वमुपलक्ष्याकारः, ब्रह्मत्वं पूर्वप्रतिपन्नाकारश्चेति । इदञ्च केषुचिच्छाण्डिल्याद्युपासनेष्वनुपास्यत्वायोपलक्षणतया केषुचिदुपास्यत्वाय विशेषणतयाच, विवक्षितमिति श्रीमांल्लक्ष्मणाचार्यः अत्रतु, कथमयमेवमाक्षिपतीदानीमतिकर्कशाशयः किञ्चिदप्यप्रति

ज्ञातवति, मुखतो भगवति सूत्रकारे, परमेवहि प्रतिज्ञास्यति 'शास्त्र-योनित्वा' दिति । अतएवनास्त्यवसरोऽध्याक्षेपस्येति, सूचयामासा-ननुभाष्य, कर्मठस्याक्षेपं भाष्यकारः । न च, कथन्तर्ह्यध्यासभाष्य-स्य प्रवृत्तिरिति वाच्यम् । यतोऽध्यासभाष्येण, न, प्रथमंसूत्रमत्रा-तीतरत्, किन्तूत्तरत्र वक्तव्यं सुखाववोधायास्माकमत्र समाकार्षीत् अत एव हि, 'यथाचायमर्थस्सर्वेषां वेदान्तानां तथा वयमस्यां शारी रकमीमांसायां प्रदर्शयिष्याम' इति भाषितं, नत्वत आहाथातोब्रह्म-जिज्ञासेति ।

अत एवाह च भगवान् पद्मपादाचार्यः, 'वक्ष्यति चैतद-विरोधलक्षणे जीवप्रक्रियायां सूत्रकारस्तद्गुणसारत्वादि'त्यादिना । यद्येवमेतदेव प्रथममस्तु । मैवं अर्थविशेषोपपत्तेः । अर्थविशेषे हि स-मन्वये प्रदर्शिते तद्विरोधाशंकायान्तन्निराकरणमुपपद्यते, भाष्य-कारस्तु, तत्सिद्धमेवादिसूत्रेण सामर्थ्यबलेन सूचितं सुखप्रतिपत्त्यर्थं वर्णयतीति, तथा च, सूचितार्थस्योपवर्णनमेव ग्रन्थकारसरणिमनुरु-णद्धि, नतु तदेवाक्षिप्य समाधीयत इति । अपिच सिद्धं ब्रह्म न वेदान्त-वेद्यं । सिद्धे व्युत्पत्तिदौर्घट्यात् । तदुक्तलक्षणस्यतत्रासंभवात्, मानान्त रमेयत्वात्, पुरुषार्थासंस्पर्शित्वाच्चेति चतुस्सूत्र्यवतरणिकाप्रणाळिका-भवतः । सेयन्न ऋज्वीप्रणाळिका, किन्तु कुटिलैव, यतोऽत्रजन्मादिसू-त्रस्य समन्वयसूत्रानंतर्यं गीर्वाणगुरुणाप्यपरिहार्यमापतति । सिद्धमपि भवति व्युत्पन्नम्मानान्तरामेयं पुरुषार्थसंबन्धिच, अतो वेदान्तवेद्यमेवे ति साधनानन्तरमेवह्यथापि तदुक्तस्य लक्षणस्य ब्रह्मण्यसंभवान्नेदन्त-द्वेद्यमित्याक्षिप्य समाधानं संगतमिति । किञ्च जन्माद्यस्ययत इत्यु-च्यते लक्षणं ब्रह्मणोवेदांतेन । तत्तु तत्र नसंभवतीत्याक्षेपे जन्माद्यस्ययत इति प्रत्युक्तमित्येतत्पामराणामपि परिहासास्पदं । अतः कथञ्चि-दपि नास्त्यवसरोह्याक्षेपस्येत्यस्वरसं मनसि निधाय, अथापि यद्य-वसरादाक्षिप्यते तदैवमेवाक्षेप्तव्यं । यथा कदाचिदपि किञ्चिदपि

कथञ्चिदपि ब्रह्मणोलक्षणन्नसंभवतीति । ननु कदा शास्त्रोक्तं लक्षणं न संभवतीत्येतदाहस्माचार्यवाचस्पतिः । 'तमिममाक्षेपं भगवान् सूत्रकारः परिहरतीति, नान्यं श्रीभाष्यकारोक्तमिति शेषः । तथा चात्र परिहसतीव भामती श्रीभाष्यश्रियं कुलाङ्गनेव कुलटाम् । अत्र माभूज्जगत्तद्धर्मतया ब्रह्मणोलक्षणम् । तदुत्पत्त्यातु भविष्यति देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति समादधाति भामती । अत्र देशांतरप्राप्तिरुपलक्षणम् । व्रज्योपलक्ष्याकारः सवितृत्वं पूर्वप्रतिपन्नाकारः, तत्र व्रज्यानन्तरभाविनीदेशान्तरप्राप्तिर्व्रज्यावच्छिन्नावृत्तिरित्युपलक्षयत्येव तदवच्छिन्नं सवितारं, न तु विशेषयति यथा, तथा जन्माद्युपलक्षणम्, निर्विशेषमुपलक्ष्यं जन्माद्यनवच्छिन्नं । सविशेषसाधारणं ब्रह्मत्वं पूर्वप्रतिपन्नाकारः । इदन्तूपलक्षयदेव निर्विशेषम् विशेषयति सविशेषं विशेषणमेव जन्मादिहेतुत्वन्तस्य स्वरूपमिति स्वरूपलक्षणतयेति विभावनीयम् ।

वयमपि किञ्चिच्चोदयामश्श्रीभाष्यकारोपरि । किमर्थमुभयात्मना लक्षणत्वमूरीकृतमिति । नचोपासनाया व्यवस्थाया इति वाच्यं । गुणान्तराणां येन न्यायेनोपसंहारानुपसंहारसिद्धिस्तेनैवास्यापि तत्सिद्धौ व्यर्थत्वात्, अस्योपास्यत्वांगीकारे जगद्व्यापारवर्जसूत्रविरोधाच्च । किञ्चोपलक्षणस्वपक्षे, जन्मादिहेतुत्वमेव हि लक्ष्मीपतित्वमिति तस्योपलक्षणत्वे भवति निर्विशेषता तस्येति मन्मतप्रवेशापत्तिः । वयन्तु स्वरूपलक्षणमेवेदं लक्ष्मीपतेरभ्युपगच्छामः । विशेषणतयेत्येतदप्युपरञ्जकतयेत्यर्थकतया वक्तव्यम् । ननु व्यावर्तकतया लक्षणमिति लक्षणन्नविशेषणं विशेषणन्नलक्षणमित्यस्यानुमानिकाधिकरणे वक्ष्यमाणत्वादिति ।

जन्मादिकंकलयतां पृथगेकमेकञ्जन्मादिकं कथमिदंवदलक्षणंस्यात् ।
जन्मादिकंकलयतामपिकारणत्वञ्जन्मादयोऽस्ययतइत्यपिसूचितोसि ।
भूतस्यनिश्वसितमेतदृगादिशास्त्रं भूतेशऽयन्महतइत्यभिवक्तिशास्त्रम् ।

शास्त्रस्ययोनिरपितद्भगवंस्त्वमेवयत्पाणिनीयमपिते हमरूपमूतम् ॥

इति जन्माद्यधिकरणशास्त्रयोनित्वाधिकरणे ।

शास्त्रयोनित्वेन सर्वज्ञं कारणमिति दृढीकृत्योत्थापितस्सांख्यः, तत्र तन्त्रेण शास्त्रयोनिकत्वप्रतिज्ञयोत्थापितः कर्मठश्च । तत्र सिद्धेनशास्त्रार्थइति वदन्तं प्रतिक्षिप्यानन्तरमेव सिद्धस्य शास्त्रार्थत्वेऽपि ब्रह्म न तदर्थइति वदतः प्रतिक्षेपो युक्तइति कर्मठमेव पुरतः प्रत्यवतिष्ठमानमिव प्रतिक्षिप्य ततश्शास्त्रमपहरति —

## ४ तत्तुसमन्वयादिति—

अतःपदेन कर्मठो गळहस्तितइत्युक्तं पूर्वं, किञ्चातः, अतस्वाधिकारविरुद्धएवायममधिकारइत्यधिकारो पक्षेपमात्रेणोपरुन्धिधन्धिकृतइति भवति । अतएवाधिकारविरोधाच्चेति पूर्वमेव तत्प्रस्तावः । अतोऽपि वा को विशेषप्रतिलम्भः । अयमतो विशेषः प्रतिलब्धः । यत् ब्रह्मान्यस्याध्यासएवेदं शास्त्रमारम्भणीयमिति—तत्कथं—इदमुच्यते । एवंकिल भगवतो जैमिनेराशयउन्नीयते यत्किल प्रमाणराजो वेदः । प्रमाणानाञ्च परस्परं विविक्तो विषयो वक्तव्यः । तथाचाप्राप्तएव शास्त्रस्यार्थवत्ता वक्तव्या । साच न सिद्धे, सिद्धस्य कथञ्चिन्मानान्तरमेयत्वावश्यंभावात्, तथाहि साधयन्ति कपिलकणभुगादयः प्रधानं परमाणुं परमपि निमित्तमात्रं परिणममानमपि प्रकृतिमिश्रमेवेति च परस्परं विभिन्नप्रस्थानाः प्रमाणान्तरेण, श्रुतयस्तु केवलश्चिन्मात्रमेवोपादानन्निमित्तञ्चाहुः । तच्च ब्रह्मान्यस्याध्यासएव भवत् भवेत् । ततश्च श्रुतिविरुद्धमपि भवति तेषां मतं । यदि चिन्मात्रमेव कारणं स्यात्तदा सिद्धमपि तन्न मानान्तरमेयं स्यात् । नहि चिन्मात्रे मानान्तरं प्रवर्त्तितुमुत्सहते विना वेदान्तप्रमाणराजं । तत्र तदन्यस्याध्यासोऽवश्यमभ्युपगन्तव्यो भवति । सतु कथं सहसैवाभ्युपगन्तुं शक्येत सर्वैरप्यनभ्युपगम्यमानस्तीर्थकारैः, कथमेववोपपद्येत विरुध्यमानेषु वेदान्तवर्जं सर्वेष्वपि प्रमाणेषु । अतस्तएवोपचरि-

तार्था वेदान्ताः, प्रपञ्चस्तु नकदाचिदप्यनीदृशइति । तत्र उपपन्नत-एवायमध्यासः ततो नायमाशयस्साधीयान्, नवा कपिलादीनामपि मतं साधीयइत्यादावेवाध्यासमुपपाद्य वेदान्तएव प्रमाणराजो नवेद समान्यमित्याहस्म भाष्यकारो, "यथाचायमर्थस्सर्वेषां वेदान्ताना" मिति । उपपादितत्वाच्चाध्यासस्य, वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं शास्त्रारंभप्रयोजकं सूत्रमितिच । नहि चिन्मात्रे मानान्तरं प्रवर्त्तितुमुत्सहते विना वेदान्तप्रमाणराजमिति साधूक्तमित्यप्याहस्मात्र, "तत्वमसीति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वा"दिति । समन्वयादित्यत्रान्वयोऽनुगमनं, पदानां परस्पर-संगतार्थाभिधानमित्यर्थः, समा, मुख्यन्तात्पर्यं द्योत्यते । गौणस्यानुनैवलाभात्, कथंचिदपि तात्पर्याभावेऽनुगमनस्यैवाभावात्, तेन कर्मोपासनयोरन्वयएव, नतु समन्वयः । अतएव ब्रह्मबोधकवेदान्तानां प्रमाणराजत्वं, परमतात्पर्येण स्वार्थबोधकत्वात्, नह्युपासनार्थं ब्रह्माभिधीयते । किंतु ब्रह्मज्ञानार्थमुपासनमित्येतदर्थं ब्रह्मणि परमतात्पर्येण पदानां परस्परमनुसरणस्य सूत्रकारेणोक्तत्वात्, प्रतिपत्ति-विधिविशेषतया ब्रह्म समर्प्यते वेदान्तेनेति वादिनः प्रत्याचिख्यासिता, अत्रापरे प्रत्यवतिष्ठन्त, इत्यादिना भाष्येणेति वेदितव्यं । व्यर्थमिदमधिकरणं श्रीभाष्यकारस्य, कुतः, अवशेषाभावात्—कथं-सिद्धमपि व्युत्पन्नं ब्रह्म, वेदान्तोक्तलक्षणलक्षितं, मानान्तरामेयञ्चेति साधिते कोवशिष्यतइति । नन्वस्त्येवावशिष्टं, तथापि प्रवृत्तिनिवृत्त्यन्यतरत्वाभावेन न शास्त्रप्रतिपाद्यं ब्रह्मेतीतिचेत्, अहहसिद्धमपि न मामानान्तरवेद्यं, अथापि न शास्त्रवेद्यं, साध्यत्वाभावादिति साधारणजनपरिहासास्पदमपिहीदं भवति चोद्यं । अथ कुतोऽयं परिहासः, अतो नास्त्येव ब्रह्मेति पर्यवसनादितिचे न्न, तथासति, प्रवृत्तिनिवृत्तिव्यतिरेकेणाप्यस्ति शास्त्रप्रतिपाद्यमित्यस्यैव साधनीयत्वात्, तत्र शक्तिग्रहप्रमाणान्तरागोचरत्वयोः परिकरत्वात्, शास्त्रोक्तलक्षणस्य

तदनन्तरकरणीयत्वाच्च भवदीयप्रणालिकायाः पामरपरिहास्यत्वा-वश्यंभवात् । किञ्चोपास्यमेव भवतां प्रतिपाद्यं । तच्चाक्रियात्वेऽपि भवति यूपाहवनीयादिवच्छास्त्रप्रतिपाद्यमिति, नास्त्येवास्यचोद्यस्या वकाशः । प्रतिक्षेपोऽपि परिहास्यपदवीमेवाधिरोहति भवतां, तथाहि प्रसक्ताशंकानिवृत्त्यर्थस्तुशब्दः । तत् शास्त्रप्रमाणकत्वं ब्रह्मण-स्संभवत्येव, कुतः-समन्वयात्-परमपुरुषार्थतयाऽन्वय स्समन्व यः, तस्मात् । परमपुरुषार्थतया ब्रह्मणोऽभिधेयतयान्वया-दित्यर्थइतिहि प्रतिक्षिपन्ति भवन्तः । तत्र पदसमन्वयो वाक्यसम-न्वयः, तथा पदार्थसमन्वयो वाक्यार्थसमन्वयइत्यस्ति तान्त्रिकव्यव हारः । नतु ब्रह्मणस्समन्वयः कर्मणस्समन्वयइति समस्ति व्यवहा-रः । अभिधेयतया ब्रह्मणोऽन्वयोऽपि पदेष्विति वक्तव्यं, तत्रापि न ह्यस्ति घटस्य पदेष्वन्वयः, पटस्य वाक्येष्वन्वयइति समञ्जसो व्य-वहारइतीदमपि परिहास्यमेव । किञ्च शास्त्रतात्पर्यविषयत्वमेव वक्त व्यं । तत्र पुरुषार्थतयान्वयः क्वोपयुज्यते । नह्यपापश्लोकश्रवणादि-कन्तथान्वीयमानमपि तात्पर्यविषयो भवति । कर्मण्येव तात्पर्यात् । परमत्वविशेषणेनापि न निस्तारः । फलगतपरमत्वस्य तत्साधनएव शास्त्रतात्पर्यविशेषाधायकत्वात् । नच परमोद्देशेन मुख्यत्वमेव सूत्रा र्थइति वाच्यं । शास्त्रप्रतिपाद्यत्वे फलवत्त्वस्यैव प्रयोजकत्वात्, फ-लत्वस्य पदार्थश्रैष्ठ्यएवोपयोगात्, अतो भाष्यइव ब्रह्मोपदेशस्य फ-लवदर्थावबोधकत्वेनैव कर्मणीव ब्रह्मण्यपि शास्त्रप्रतिपाद्यत्वं व्यव-स्थापनीयं । तत्र यदि भवति फलत्वं ब्रह्मणो भवतु कामं । नतत्प्र-तिपाद्यत्वे प्रयोजकं भवति, अथैवन्तर्हि कथं ब्रह्मणि तात्पर्यस्य सिद्धिः, तत्साधनएव हि तत्सिध्येदितिचेत्-नास्मान् प्रत्ययमाक्षेपः प्राप्नोति । यइमे वयं ब्रह्मज्ञानव्यतिरेकेण ब्रह्मप्राप्तिन्नाभ्युपगच्छा-मः । यदि साधनीभूतोपासनव्यतिरेकेण ब्रह्मप्राप्तिमभ्युपगच्छतो युष्मान् प्रत्ययमाक्षेपः प्राप्नोति तदा युष्माभिरेव प्रतिकर्तव्यं । किं

कुर्मो वयं । अस्माकन्त्वत्रान्तरतात्पर्येणैवोपास्यसिद्धिः । तथाच नि-र्गुणमिव सगुणपि दुर्लभं भवतामिति स्थिते, कुतोऽत्र जरन्मायावादिमतन्तरुणमायावादिमतमित्यवहेळनस्यावकाशो भवतां पृथग्जनपरिहासास्पदानामपीति ॥

सिद्धेऽपि शक्तिमनुरुद्ध्य समन्वयेन
शास्त्रैकगम्यइति शंकर साधितोऽसि ।
आवर्तनावधिगुणागुणसाक्षिभाव-
मापद्यमानइति नेतरमानमेयः ॥

इति समन्वयाधिकरणम् ॥

अथेदानीं सांख्यः प्रत्यवतिष्ठते । अयञ्च स्वपक्षरक्षणाय वा परपक्षप्रतिक्षेपाय वा प्रणिधत्ते, इयंच सप्तसूत्रीकारणसामान्यविषयिण्यपि प्रधानतस्सद्विद्याविषयिणी, ईक्षत्यादेस्तदन्तर्गतस्य विस्पष्टमुपन्यासात्, तत्रच चतुस्सूत्री तस्य स्वपक्षप्रतिक्षेपिका, त्रिसूत्री तु प्रतिबन्दीनिरासिकेति विवेकः । तत्र प्रथमपक्षोपक्षेपकं, सांख्यास्तु तत्परतयैव वेदान्तवाक्यानि योजयन्तीति भाष्यं । तानि प्रधानपक्षेऽपि योजयितुं शक्यन्ते । सर्वशक्तित्वन्तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यतइति भाष्यन्तु द्वितीयपक्षोपक्षेपकं प्रतिबन्दीह्यनेनोपक्षिप्यते । प्रधानपक्षेपीत्यपिनापक्षपदग्रहणेनच ब्रह्मैवाश्रयणीयमिति कोऽयन्निर्बन्धः प्रधानमेवचाश्रीयतामिति प्रत्यवस्थानात् । अथ वास्तूभयमपि कारणमुपादाननिमित्तभेदेनेति प्रतिबन्द्यन्तरं । वक्ष्यति च सूत्रकारोप्यानुमानिकमपीत्यत्रेनेममपि पक्षं, ननु स्वपक्षात्प्रतिबन्दीप्रथमपक्षस्य फलतः को विशेषः, अयमेव पक्षआश्रीयतान्नतु ब्रह्मपक्षइति पर्यवसानात्, अतएवापिकारावेवकारार्थावित्यत्र भामतीतिचेत्–न–नेयं ब्रह्मपक्षव्यवच्छेदिका भामती । किन्त्वनिर्धारणपूर्वपक्षभ्रमव्युदासिका, तथाचात्र कल्पतरुः, भाष्येऽपिकारदर्शनादनिर्धारणपूर्वपक्षइति केचिद्व्याचक्षते, तद्व्यावर्त्तयत्यपिकारावितीति,

आनुमानिकाधिकरणे च न चानेककारणवैयर्थ्यं, कल्पभेदेन व्यवस्थोपपत्तेरिति, वयन्तु प्रतिबन्दीत्वादस्त्वयमपि कश्चित्पक्षइति मन्यामहे, अस्यान्यायत्वेस्तूभयमप्युपादानं, तत्रच वैयर्थ्येऽस्तु कल्पभेदेन व्यवस्था तत्रापि दोषे भवतु निमित्तोपादानभेदेनेति च, एवञ्च सूत्रभाष्ययोरपिरुभयार्थोऽपि भवति समुच्चयार्थोऽवधारणार्थश्चेति, तथाचानुमानिकाधिकरणे भाष्यन्तदेवच कारणमिति चकारघटितन्तदपि कारणन्तदेवच कारणं, ब्रह्मैवच कारणमित्याद्यर्थकं, एवमुभयथा प्रत्यवतिष्ठमाने सांख्ये, सेक्षणमेव कारणमिति शास्त्रसिद्धेनैव शास्त्रयोनित्वेन दृढीकृतेऽपि कथमेवमनीक्षणमेव प्रधानं कारणमुच्यते शास्त्रेणेत्याक्षिप्यतइति वदन्निवेक्षणमेव प्रथमन्दर्शयित्वा क्रुध्यन्निवच पश्चाद्दण्डं पातयति —

## ५ ईक्षतेर्नाशब्दमिति ।

अत्र न सांख्यपरिकल्पितमचेतनं प्रधानञ्जगतः कारणं शक्यं वेदान्तेष्वाश्रयितुं, अशब्दं हि तदिति भाष्यं, अत्र कुतइत्यनाक्षिप्यैव हेतुरवलंबितस्संयोजितश्च हिकारेण, तथाचास्यायमर्थो भवति भाष्यस्य, कथं, कथमेवमाक्षिपसि, नैवेदमुच्यते प्रधानं भवता परिकल्पितं कारणं वेदान्तैः, यत्कारणं, यतो यत्कारणं प्रधानन्तदुच्यते शास्त्रेणेत्यवोचः, नतु यदुच्यते शास्त्रेण तत्कारणमिति, अप्राप्ते हि शास्त्रस्यार्थवत्ताविविक्तविषयाणिहि प्रमाणानीति, सच न्यायः कर्ममीमांसकाभ्युपगतोऽनुगृहीतोस्माभिरपि,तत्रसिद्धस्य नाप्राप्तिरित्येतत्परं व्युदसनीयं व्युदासितं, तत्कथं मानान्तरावगतं शास्त्रार्थस्स्यात् प्रधानं, अशब्दं हि तद्भवतीति, एवन्निगृहीतेऽपि तस्मिन्नाहमिमन्यायमुपैमि, किन्तु प्राप्तमेव संवदते शास्त्रमित्युपैमि, तत्र कथमशब्दत्वमिति पुनः प्रत्यवतिष्ठमाने—आहेक्षतेरीक्षितृत्वश्रवणात्कारणस्येति, अत्र प्रधानन्नवेदान्तवेद्यं, वेदावेद्यत्वात् , घटवत् , कर्मान्यच्छास्त्रप्रतिपाद्यन्नप्रधानमीक्षितृत्वेन श्रूयमाणत्वात् , जीववत् , व्यतिरेकेण

प्रधानवदेति प्रयोगावनुमेयौ–ततस्सदीक्षणं गौणं, प्रकरणविशेषपठित त्वात्, तैजसेक्षणवदिति सांख्यस्य प्रयोगे, अनात्मेक्षणत्वमुपाधिः, सदीक्षणमुख्यं, आत्मेक्षणत्वाज्जीवेक्षणवदिति प्रतिप्रयोगो वा—

## ६ गौणश्चेन्नात्मशब्दादिति ।

सोऽपि गौणश्चेन्न–तन्निष्ठस्य मोक्षोपदेशादिति । अत्राथवा पूर्वसूत्रएवात्मशब्दन्निरस्तसमस्तगौणत्वाशङ्कतया व्याख्याय स्वतन्त्र एव प्रधानकारणनिराकरणहेतुर्व्याख्येयइत्यस्ति भाष्यं । तत्र किमर्थएवकारः, न पूर्वशेषइत्येवमर्थइतिचेन्न–तदभावेऽपि लाभात्, न चाशब्दत्वादिकमिव न सहायापेक्षइत्यर्थइति वाच्यं । अस्यापि गौणत्वशङ्कानिवृत्त्यर्थमुत्तरापेक्षत्वादितिचेन्न–यथाऽशब्दत्वं स्वरूपसिध्यर्थमेव सहायापेक्षस्ससहायएवप्रयुक्तस्तथा नायमतोऽसहायएव प्रयुक्तइत्येवमर्थत्वात्, तथाचात्र प्रकारान्तरं प्रवर्त्ततइति भवति, ननु कोऽयं प्रकारः, कीदृशोवापूर्वइति चेत्–उच्यते, पूर्वं सानुयायिनासह प्रयुक्तः प्रधानसाधकः, अत्र सहप्रयुक्ताभ्यां सानुयायीकृतस्तादृश इति, कौ तौ सहप्रयुक्तौ, अवचनप्रतिज्ञाविरोधौ, ननुचाद्वचनं सहप्रयुक्तं, यतआह श्रीमांल्लक्ष्मणार्यः. चकारेण तत्त्वमसीत्युपादेयत्ववचनं समुच्चीयते, अस्ति च प्रतिज्ञाविरोधादिति सूत्रमिति, युक्तश्चात्रवचनस्य वचनेन समुच्चयइति चेत्-अहह कथमेवमधिकरणमाकुलयितुं प्रवर्त्तते श्रीमानस्वरसक्रमभंगप्रसंगेन,भज्यते हि स्वरसःक्रमो वचनावचनयोर्वैपरीत्येन, उक्तार्थत्वप्रसंगाच्च, उक्तोह्ययमर्थस्तन्निष्ठस्येति, नहि तन्निष्ठत्वव्यतिरेकेणास्त्युपादेयत्वं बदरस्येवसतः, प्रक्रियाभंगप्रसंगाच्च, भज्यते हि प्रक्रियैवं सति सूत्रकारीया, ननु केयं प्रक्रिया-कथमस्याभंगइति चेत्–शृणवधानतः–प्रथमन्तावत्कर्मठादाहृतं प्रमाणं ब्रह्मणि वेदान्तः, तदनु प्रमेयाहरणाय प्रधानमल्लेनायोधनं क्रियत इतिमनसि निखातव्यं । तत्राशब्दत्वमुपक्षिप्य प्रतिरुद्धे प्रधानमल्लेऽश्रशेचतेन तस्मिन्नीक्षणमपिसहप्रायुङ्क्त,तत्तु गौणत्वेन प्रतिरुन्धति तस्मिं

स्तस्यात्मशब्दोनुप्रयुक्तः, तत्रापि गौणत्वमाशंकमाने तस्मिन् गौणत्वसोपानपरंपरामारोढुं प्रवृत्तोऽयमिति मन्वानस्तदनुच प्रयुयोजतन्निष्ठस्येत्युपर्यारोहणप्रतिरोधकं स्वतंत्रञ्च साधनमिति भाष्यात्प्रतीयते, स्वातन्त्र्यञ्च नचेक्षणं गौणमात्मशब्दात्, नचात्मशब्दोगौण ईक्षतेरिति परस्परसहायाभ्याम्ताभ्यामेव संस्तम्भनेन, तेन सूत्रद्वयेनैकत्रिकं संपन्नं, अनेन तु स्वपक्षसाधकाभ्यां भावरूपाभ्यां पृष्ठानुपृष्ठगाभ्यां परस्परावष्टंभेन प्रबलीकृताभ्यां कथंचिदपि चालयितुमशक्याभ्यामीक्षणात्मशब्दाभ्यां लिंगश्रुतिभ्यामुपोद्बलितेन परपक्षप्रबाधकेनाभावरूपेणाशब्दत्वेन साक्षादेव प्रबाधितं प्रधानं प्रथमेन त्रिकेण, अत्र कारणवाक्यसामान्यं प्रधानपरतया समर्थनीयं ब्रह्मद्वेषिणा। ब्रह्मनिष्ठेन तु तत्सामान्यं वा तत्रैकं वा न तत्परमिति पराकरणीयं, तत्राद्यः प्रकारःप्रणतः, ततः प्रकारान्तराय दत्वावकाशमुपदेशोपि गौणश्चेन्न हेयत्वावचनाच्चेति तदनु प्रायुङ्क्त । नच वचनं कर्तव्यमिति वाच्यं, प्रतिज्ञाविरोधात्, सापि गौणीचेत्तर्हि हेयत्वं वक्तव्यं, नचैव मवोचदिति संस्तंभनं, अत्र प्रकारान्तरसूचकन्तस्मान्न प्रधानं सच्छब्दवाच्यमिति भाष्यं। नच वचनमपि कर्तव्यं, प्रतिज्ञापि गौणीति वाच्यं, निश्चित्य पूर्वमेव कारणमेवं गौणं गौणमिति ब्रुवतस्तव श्रुति संवादइत्यस्यैवासंभवादितिच चकारेणैव संस्तम्भनं । एवञ्चानेनापि सूत्रद्वयेन द्वितीयमपि त्रिकं संपन्नं, अनेन च परपक्षप्रबाधकाभ्यामभावरूपाभ्यां परस्परावष्टंभेन प्रबलीकृताभ्यां कथञ्चिदपि चालयितुमशक्याभ्यामवचनासांगत्याभ्यां लिङ्गाभ्यामुपोद्बलितेन स्वपक्ष साधकेन भावरूपेण वाक्येनार्थात् प्रधानप्रबाधनं कृतं द्वितीयेन त्रिकेण, एवमेकन्तस्य स्वपक्षबाधकं प्रकरणमुपसंहृतञ्च चकारेण, प्रकारपरिसमाप्तावपि प्रकरणापरिसमाप्त्या द्वितीये सूत्रे न चकारः, एवं श्रौतप्रतिज्ञाविरोधसमुच्चायकेन चकारेण प्रतिबन्दीमवलम्बमानस्य सांख्यस्य प्रतिज्ञाविरोधोऽपि गर्भीकृतो वेदितव्यः । एवञ्च षडपीमान्

हेतून् दर्शपूर्णमासवत्त्रिकद्वयीकृत्य धर्मेण पापमिवापनुनोद ब्रह्मविद्वेषिणं भगवान् सूत्रकार इति भवति । पश्चात्तु पार्श्वचराभ्यामिव भावरूपाभ्यामेव स्वाप्ययश्रुतत्वाभ्यां श्रौतलिंगवाक्याभ्यामुपोद्बलितेन भावरूपेणैवाशब्दत्वप्रतिद्वंद्विभूतेन गतिसामान्येन लिंगेन ब्रह्मैव कारणमिति स्वपक्षमेव परिरक्षन्परं प्रतिचिक्षेपान्तिमेन त्रिकेणेतिसारं। अतएवात्र भाष्यं, अतस्तच्चेतनं जगतः कारणन्नप्रधानमिति, कुतश्चन प्रधानञ्जगतः कारणमितिच, तथाच प्रक्रियाभंगप्रसंगात् प्रधानस्य सत्पदावाच्यत्वमेकमेव साध्यीकृत्य प्रवर्त्तमानन्नोपादेयमेवश्रीभाष्यं। यतस्वयमेव सूत्रं ग्रथयति चकारार्थश्च श्लथयति, प्रक्रियाञ्च भञ्जयति स्वारसिकां सूत्रकारीयां श्रीभाष्यकारः । प्रतिबन्दीनिरासस्तु चेतनैककारणगतिसामान्यात्, नहि कारणान्तरसद्भावे तदेककारण गतिसामान्यं संभवति, तच्च स्वाप्ययादवश्याभ्युपेयं, प्रत्यहं स्वंह्यपीतेन भवितव्यञ्जीवेन सत्पदाभिधानं कारणं, तत्र कल्पभेदपक्षे कल्पान्तरेकंहि स्वमपीयाज्जीवः । नहि जडश्चेतनस्य स्वं भवति नहि स्वात्मीये घटादौ कश्चिदपीतो भवति, निमित्तमात्रत्वपक्षे तु सदावा कमपीयात्, उभयपक्षे विशिष्टपक्षेपि वा कथं स्वमपीतस्स्यादनुभयात्मकोऽविशिष्टात्मकश्च जीवः । कर्ममीमांसकः किल जडाजडात्मकंजीवमुपगच्छति, सतु ब्रह्मवा प्रधानं वा नेच्छति, श्रावयति च श्रुतिःस कारणं कारणाधिपाधिपइति सर्वज्ञं सर्वोपसंहर्तारं कारणं परमेश्वरं, एवन्त्रिकत्रयेण जितः प्रधानमल्लः, एवमेवच किल बहुप्रकारम्मल्लायोधनं पश्यामः, परेतु समन्वयान्तेन विचारपंटिका निर्वृत्ता, इदानीं शास्त्रमारभ्यते, नाशब्दमीक्षतेरिति । ब्रह्मकारणमेवेत्ययोगव्यवच्छेदार्थः प्रथमः पादः, अन्ययोगव्यवच्छेदिकात्रिपाद्यस्पष्टस्पष्टस्पष्टतरजीवादिलिंगिकेति वर्णयन्ति । वयन्तु विचारारंभस्समर्थितः प्रथमसूत्रेणैव,सम्भावितसद्भावं ब्रह्म जन्मादिना धूमनेव धूमध्वजः,शास्त्रयोनिकञ्च ब्रह्म, तेन नानुमानमुपन्यस्तम्मया, आनुमानिकन्तु न कारणं,

अतः कारणमेव ब्रह्म, तदेवच कारणं, सत्पदाभिहितत्वात् सन्मात्रमेव ब्रह्म, नहि सदन्तरसत्वे सत्पदेन निर्दिश्येत, व्यावृत्तेन हि शब्देन पदार्थो निर्दिश्यते, सदन्तराभावादेव न सत्तादिविशिष्टं, किन्तु सन्मात्रमेव अतएवेक्षतिरेव, नत्वीक्षितृ, यदि सत्वमीक्षितृत्वञ्च व्यवहाराय कल्प्यते कल्प्यतां यथेच्छं, सत्वात्मासर्वस्य, तदप्ययाधारत्वात्, सन्निष्ठस्यैव मुक्तिर्नत्वसन्निष्ठस्य, तन्निष्ठमेव शास्त्रं, श्रावयतिच तमेव कारणमप्ययाधारंश्रुतिः परमेश्वरमित्येतत्सर्वं श्रुतत्वाच्चेत्येवमंतैस्साधितं, श्रुतत्वाच्चेति श्रवणानन्तरमपि ब्रह्म कारणंवा नवेति नशंकनीयं वैदिकैः, अतआनन्दरूपतापरमवशिष्टावशिष्टं यत्पुच्छन्तन्निर्धारणेन निर्धारणीया, गतिसामान्यञ्च विशिष्य समर्थनीयं, तच्च ब्रह्ममीमांसायां स्पष्टास्पष्टतल्लिङ्गकमेव वाक्यमुदाहृत्य, नतु जीवादिलिंगकं, अतन्मीमांसात्वात्, यत्र मात्रयापि नास्ति ब्रह्मलिंगन्नतच्छक्रेणापि ब्रह्मपरन्नेतुं शक्यं, प्रमाणलक्षणोयमध्यायः, नत्वयोगाद्यध्यायः, उपहितविषयोऽयं पादः, यत्र शुद्धमवरूढं यतोवरूढं च विशिष्टं, तच्च विशिष्टं शुद्धञ्चोपपादनीयं परस्तादित्यादिकमुपगच्छामइति । अत्र प्रसंगात्, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशतेदेवएक इति श्रुतिमुदाहृत्य, अमृताक्षरं हरो रुद्रः, सतु जीवः, क्षरात्मानौ प्रधानजीवौ एकोदेवो नारायण ईशते, स्वायत्तीकरोतीति व्याकृतं श्रीभाष्यकृता श्रुत्यर्थमजानता,-तथाहि— अमृतशब्दात्सुपोलुक्, अमृतंजीवः, सत्वक्षरं, तथाच क्षरात्मानौ एकोदेवो हरः, ईशते, स्वायत्तीकरोति, स्वात्मभावमापादयतीति श्रुत्यर्थः, अन्यथेशतइत्यस्य कर्त्रभावप्रसंगात्, नहि देवइति नारायणस्य वाचकः, अमृतपदवैयर्थ्यप्रसंगाच्च, अत्र क्षराक्षरस्वरूपप्रदर्शनपूर्वकन्तदीशितारान्निर्धार्य तत्रेशनं विधीयते, तत्र किं क्षरमित्याकांक्षानिवर्त्तकं प्रधानं क्षरमिति, अथ किमक्षरमिति प्रश्नेभवन्मतेऽमृतोहरोऽक्षरमिति वक्तव्यं यथा कश्चन्द्रइति पृष्टे प्रकृष्टप्रकाशश्चन्द्रइति, नतु हरोऽमृताक्ष-

रमिति, नहि कोदेवदत्तइति पृष्टे मित्रातनयश्श्यामदेवदत्तइत्युत्तरयन्ति लोकाः, किन्तु श्यामोमित्रातनयो देवदत्त इत्युद्देश्यमत्र विशिंषन्ति, तत्तनयान्तरव्यावृत्त्यर्थं, नतु विधेयमरुणदेवदत्तव्यावृत्त्यर्थमनाकांक्षितत्वात् तथाच भवताप्यवश्यं लुगङ्गीकर्तव्यो भवति । व्यवहितान्वयस्त्वधिको भवति दोषः, ईशितुरनिर्धारणाच्च न्यूनता, अस्मन्नयेतु हरइति निर्धारितोभवति, ईशनञ्च स्ववशीकरणं सर्वस्वापहरणेनापि, तत्र हरत्वमुपयुज्यते, नतुश्रीमन्नारायणीयं पालकत्वं, विरोधात्, एकत्वमपि तत्रोपयुक्तं हरस्यैव, यदाह भगवतीश्रुतिः एकएवरुद्रो नद्वितीयाय तस्थे, यएको रुद्र उच्यतइतिच देवत्वमपि तस्यैवानुशासनिके स्पष्टं, देवीतिच तत्रतत्र भगवती नारायणी निगद्यते, अतोऽजानतैव श्रुत्यर्थमन्यथाव्याकृतं भवतेति सिद्धं । अत्रायन्निष्कर्षः–अस्ति काचिन्महादेवे महामाये महेश्वरे महती विभूतिर व्यक्ता महासुषुप्तिः, सचोपहितं बीजभावापन्नं विशेषविधुरं सन्मात्रं सत्पदाभिधेयं ब्रह्म, यत्रेक्षतिरवततार शान्तं शिवमद्वैतं शुद्धं ब्रह्म । यच्च विशिष्टं सत्वमत्तीत्यात्मा सतु तां विजृम्भयन्विभूतिं भवोद्भवो हिरण्यगर्भो भवति सर्वस्यास्य जनयिता चराचरस्य यस्य हिरण्यमिव चैतन्यं गर्भे भवति, नत्वन्तर्बहिश्चाभिव्यापकं, विजृंभिताञ्च तामभिव्याप्नुवंस्तत्पुरुषो विष्णुर्नराणामयनन्नारायणः पुरुषोत्तमइति भवति, तामेवानुप्रविशन्सद्योजातो जीवोनाम भवति यइहामृतपदेनोक्तः,तथाच क्षरं प्रधानममृतञ्जीवरूपमित्युपब्रह्मणं, सएवेशानस्सर्वविद्यानां रुद्रो बभूव, यइह हरशब्देनोक्तः, सचायं हरो विजृंभितां स्वविभूतिं विष्णौ विन्यदधात्, सर्वविद्यानिधिस्सर्वैषणाविधुरो महाभिक्षुकः, तदाह भगवती श्रुतिः पदं यद्विष्णोरुपमन्निधायीति । विष्णोर्यत्पदमधिकारस्तदुपमं लक्ष्मीसमीपे निधायीतिश्रुत्यर्थ,ः, स च विष्णुः प्रधानस्सर्वेषामासीत्, यइह क्षरशब्देनोच्यते, क्षरणञ्च तस्य प्रळये आगन्तुकलक्ष्मीवियोगेन नतु तस्य तस्यास्संबन्धेन च्यु-

तिर्भवतीश्वरत्वादतस्सोच्युतइति संकीर्त्यते, अमृतन्तु स्वरूपतो यज्जैवं रूपन्तत्तूपाधिसंवलनेन च्युतं भवति, यतस्संसरति, यस्तु हरो नारायणीभूयाबिभ्रद्विजृम्भितां विभूतिं स्वस्वरूपेण तत्साक्षीवावर्त्ततस्थितिसमये सएष जीवेश्वरोपाधिद्वयमव्यक्तीकृत्य परित्यज्य विभागमेको देवो महामायो महेश्वरो महानटो बभूवेति श्रुत्यर्थइति ।

सर्वश्चेदमभिप्रेत्य सकारणं करणाधिपानां विशेषतो जीवानां सामान्यतो ब्रह्मविष्णुरुद्राणामधिपः अधीत्य पालयिता महासुषुप्तौ स्वात्मभावमापादयिता नचास्य कश्चिज्जनिता नचाधिपइत्यर्थिका श्रुतत्वाच्चेति श्रुतिरुदाहृता सूत्रकृता विवृता भाष्यकृता लिखिता चाभिसन्धिमात्रभेदवता भवतेति सर्वं शिवं ।

तत्तेऽनलेक्षण विलक्षणमीक्षणश्चेदात्मायते नम इति श्रुतिरब्रवीचेत् ।
सर्वाप्ययेऽप्ययविवर्जितएकएव संवर्तसे यदि तदा सदसि त्वमेव ॥

हित्वा हि हेयमखिलं विधिसूनवस्ते
लब्ध्वा त्वयीश परमां प्रणिधाननिष्ठाम् ।
त्वज्ज्ञानलब्धनिखिलज्ञपदं प्रपन्नाः
कैवल्यमुक्तिमभजन्निति सुप्रसिद्धम् ॥

इतीक्षत्यधिकरणम् ॥

## ६ आनन्दमयोऽभ्यासात् ।

वैदिकतार्किकमल्लौ प्रत्येकं प्रधर्षितौ, तत्र सामान्यतश्शास्त्रयोनिब्रह्मेति प्रतिज्ञाय मुख्यया तात्पर्यवृत्त्यापदानामन्वयात्प्रसाधितं, तच्च वेदानामेकवाक्यत्वाय कर्मैकपरत्वमुपेयतस्सर्वात्मना विपरीतं संवृत्तं, तदनु कर्मकारणविषयभेदेन पूर्वापरविभागतयाद्व्यर्थो वेदइत्युपयन्सांख्यो नत्वदभिमतंजगतो योनिः, यतो नशास्त्रयोनि, यत्तु गर्भावृतमिव योन्याऽविद्यावृतं शास्त्रेणैव प्रकाश्यते तदेव शास्त्रयोनि शास्त्रस्यच तदेव योनिःप्रकाशको जगतश्चाव्यक्तस्य, यतो योनिरिति गीयते, त्वदभिमतं त्वशब्दमेव मदभिमतन्त्वीक्षितृ, अत्रैव गति-

सामान्यं, श्रुतंच विस्पष्टन्तदेव कारणमिति पराकृतः, ततस्तु सांख्येनस्यात् कथञ्चिन्निष्कृतिरितिप्रतीक्षमाणःकर्ममीमांसकस्तेनानुगतः पुरस्तात्प्रत्यवतिष्ठते । तदनुयायीच सांख्यः पश्चादित्येतत्सूत्रक्रमविन्यासविशेषाद्विज्ञायते, यतोऽत्र षट्सूत्र्या प्रतिक्षिप्य प्रथमं पश्चात्कामाच्चेत्यादिद्विसूत्र्या प्रतिक्षिपति पृष्ठतो निलीनमिवाद्रावमानं सांख्यं । पृथक्पराजितयोरपि मिलित्वा पुनरभियोगस्तथैव शूरेण तत्पराभवश्चेति लौकिकोऽपि न्यायोऽत्र सुसंगतो दृश्यते, परन्तु सर्वाण्यपि जीवाशङ्कानिराकरणपरतया विवृण्वन श्रीभाष्यकारएवात्रासंगतो दृश्यते । तत्रैवं प्रथमस्य प्रत्यवस्थानं—नन्वानन्दवल्ल्या जीवएवदृश्यते समन्वयः, नतु त्वदुक्ते ब्रह्मणि, यतोऽधीतयजुरादिसर्ववेदस्य, तन्मयतामापन्नस्य तत्संस्कृतमनोमयस्य ततःपरन्तदुक्तसर्वार्थविज्ञानवतोऽत्यन्तं श्रद्दधानस्यानुष्ठितनिखिलकर्मोपासनस्य तस्यैव विज्ञानमयस्य पश्चाच्च तज्जन्यप्रियमोदादिफलभाजो जीवस्यानन्दमयस्याथर्वाङ्गिरसादिवदवयवत्वेन श्रूयते ब्रह्मेति—तत्प्रतिक्षेपार्थमिदं सूत्रं आनन्दमयोऽभ्यासादिति, कोवार्थइति विविच्यते, नन्वाभ्यासोनाम समानेन पदेन पुनःपुनः परामर्शः सचात्रानन्दपदेन, आनन्दश्च ब्रह्म, अतस्सएवानन्दमयइत्यर्थः, अथाभ्यस्यतान्नाम ब्रह्म, अथापि कथमानन्दमयो ब्रह्मेतिचेत् अधिकृतस्यैवाभ्यस्यत्वादन्यथाऽप्रसक्तप्रसंगादिति, अथैवं निर्बन्धे कथम्मयटोविकारार्थत्वशंका सतिच प्राचुर्येऽपि स्मरणे, प्रायपाठबलेन स्यात्, न स्यात्, नियमस्यैव ततो बलीयस्त्वात्, अथानन्दमयस्यैवोत्तरत्रानन्दपदेन निर्देशोलक्षणया जीवस्य यथा ज्योतिष्टोमस्य ज्योतिष्पदेनेत्येवम्मन्वानस्य प्रायपाठबलात् प्रत्यवस्थानमितिचेन्न यतो निर्णीतार्थस्यैकदेशेन निर्देशइति निर्णयो दृष्टान्ते, इहतु कथं संदिग्धस्यार्धांशनिर्देशइति निश्चेतुं शक्यमिति, ननूभयथास्मरणेऽपि प्रथमं प्रायपाठबलादाक्षेपः, तस्य ब्रह्मप्रतिपादकानन्दपदाभ्यासेन समाधिः, ततःप्रायपाठस्य गतिः केति

पुनराक्षेपे प्राचुर्येऽपि स्मरणात्पर्यायान्तरगतार्थस्मरणापेक्षया प्रकृत पर्यायगतार्थानुसरणस्यैव युक्तत्वाच्चेति प्रतिक्षेपस्य कानुपपत्तिरिति चेन्न एवंसति वाक्यशेषवशादर्थनिर्णयइति भवति, तत्राभ्यासः को-पयुज्यते, उत्तरादित्येवहि वक्तव्यं, किञ्च चतुर्वारं हृदयमारूढे वि-कारार्थेमयटि सकलशास्त्राध्ययननिखिलकर्मानुष्ठानावस्थोपस्थितिनि रन्तरितप्रियमोदादिफलावस्थोपस्थितिसहकृते च कथन्नामार्थनिर्देश-तयापि नेतुं युक्तेनोत्तरेणानन्दपदेनाधिकृतमयडन्तनिर्णयश्चेति-ननु प्राणमयएव विकारार्थो गतः, किन्तु प्राणवृत्तिप्रचुरइति विवृतं, केन? श्रीमता. कथमेतदेवं स्यात्, स्यादप्येवं, यद्यन्योऽन्तरआत्मान्योन्तर आत्मेत्युक्ताःपञ्च आत्मानस्स्युः नचैतदस्ति, किन्त्वेकस्यैव तत्तन्मय-तया तत्तद्विकारता. एवञ्च पञ्चापि विकाराएव नकोऽपि प्रचुरः, य-दि प्रचुरस्तदाविज्ञानमयोऽपि कुतो नब्रह्म स्यात्, वर्त्ततेहि तत्रापि प्रकृतिमात्रस्याभ्यासः, किञ्च ब्रह्मेतीक्षितेत्यात्मेति सदित्येवञ्च सा-धितं पूर्वं, नत्वानन्दइत्यपि, तत्र कथमानन्दपदं ब्रह्मेति निर्णयः कथंवा मयडन्तोपि तेन तदर्थइति निर्णयः अथाभ्यासेनानन्दपदे ब्र-ह्मणि तात्पर्यं लिंग्यते, यद्विवक्षितन्तदेवाधिक्रियेतेति सूत्रार्थइतिचे-न्न-स्यादेतदेवं, यद्यन्यविवक्षयान्यन्नाधिक्रियेत, नचैतदस्ति, यतः पारिव्राज्यविवक्षया याज्ञवल्क्यस्य द्वे भार्ये इत्यारब्धं, रावणादीन् प्रकृत्य श्रीरामादीनभ्यस्यन्ति कवयः, सूक्ष्मान्तारन्दर्शयितुं स्थूलन्ता-रन्दर्शयन्ति प्रथमं लोकाश्च, अतो यत्पदेनोपादाय समन्वयान्तं प्र-साधितन्तत्पदाभ्यासमेव हेतूकृत्य स्वयमप्यभ्यस्यति तत्पदं सूत्र-कारः, अभ्यासोऽपि तात्पर्यस्यैव निर्णायकः, तेन यत्र यदभ्य-स्यते तत्र तदेव विवक्षितमित्ययमेवार्थआञ्जसः, नतु तदेवाधिकृत-मिति, व्यभिचारात्, तथाचानन्दमयवाक्यं ब्रह्मपरमित्यर्थः पर्यव-स्यति, ततो येन देवासुरमनुष्यादिभ्यो विलक्षणीकरणं पशुपक्ष्या-दीनांपुच्छेन तच्छब्दान्नेतिपुनराक्षेप प्राचुर्यात्मायापत्तेरिति प्रतिक्षेपः,

आधिक्यात्, यतश्शिरआद्यपेक्षया दत्तमधिकं प्रतिष्ठेति विशेषणं पुच्छे सर्वत्र तस्मादित्यपि विवक्षितं, तेन नह्यन्नमयादीनि वक्तव्यानीत्युक्तानि, किन्तु यत्तेषां पञ्चानामपि प्रतिष्ठाधिष्ठानमतएव तत्सर्वबाधानवधिभूतं पुच्छमवशिष्टं ब्रह्म तदेव वक्तव्यमिति तेषामप्युक्तिः कल्पनापि तेषुशिरआदीनां, यतोऽत्र प्रतिष्ठेत्याधिकं दृश्यतइत्यर्थः पर्यवस्यति, तृतीयसूत्रन्तूपपत्तिपरतया भाष्ये प्रपञ्चितं वृत्तिमते । सापि तात्पर्यस्यैव लिंगं, यदि ब्रह्म नविवक्षितं तर्हि किमर्थं सानन्दमयस्य प्रपञ्चस्य हेतुत्वेन व्यपदिश्येतेति स्वमतेऽप्युपपादितं, ततो मांत्रवर्णिकमेवच गीयतइति सूत्रं, इदन्तु गीयते स्तूयतइत्यर्थवादप्रदर्शनपरं, अत्र क्लीबान्तमांत्रवर्णिकपदेन तदन्तमंत्रवर्णघटकपदघटितोऽर्थवादस्सूचितः, सचासन्नेवेत्यादिर्ब्रह्मपदघटितो द्विरुक्ततत्पदेनाभ्यासोऽर्थवशादर्थवादश्च भवति तात्पर्यलिंगमेव, वृत्तिमतेतु मांत्रवर्णिकमेव ब्रह्मेहानन्दमयइति गीयतइति वक्तव्यं, तत्र गायतिर्नोपपद्यते, नह्यनेन वाक्येन किञ्चिद्गीयते, अतएवेदं पदन्नविवृतं भाष्यकृता प्रतिपाद्यतइति नपदार्थस्स्तुतिस्त्वत्र नास्तीत्यभिप्रयता, क्लीबान्तत्वञ्च नप्रत्यभिज्ञापकमत्र लिंगान्तरस्यैव सत्वात्, प्रत्यभिज्ञाभावाच्च नास्य तद्ब्राह्मणत्वं, अतो वृत्तिमतेऽब्राह्मणस्यैव ब्राह्मणत्वं कल्पितं सूत्रकृतेति स्यात्, तन्मताभिप्रायेतु प्राकरणिकएवचेति वक्तव्यमित्येतदपि संसूचितं भाष्येण, यतो मन्त्रब्राह्मणयोरेकार्थत्वं युक्तं अविरोधात्, अविरोधार्थमित्युक्त्वा अन्यथाहिविरोधस्स्यादिति वक्तव्ये, अन्यथाहिप्रकृतहानाप्रकृतप्रक्रिये स्यातामित्युक्तं भाष्ये। तथाच वृत्तिर्नसूत्रानुगुणेति सिध्यति, एवम्मत्तमपि मतंगजं प्रतिक्षिपति महामारुत,अभ्यासो नामात्र शतगुणितोत्तरक्रमेणानन्दस्य गुणनं तादृशप्रचुरानन्दवत्वादित्यर्थइत्यस्य कावार्त्ता श्रीभाष्यमशक्तस्य, यतोऽत्रोत्तरसूत्रार्थोऽपि क्रोडीकृतोभवति, नचायमवैय्याकरणः पूर्वपक्षीति शङ्कुं शक्यं, येन प्राचुर्येऽपिस्मरणस्मारणार्थमुत्तरसूत्रमिति

समाधातुं शक्येत । तृतीयसूत्रमपि नात्यन्तमुपयोगाय स्यात्, एव-श्च प्रथममभ्यासः, ततस्स्वपक्षस्यैव साधकतया बाधकतयोक्तस्य प्र-बाधनं, ततउपपत्तिः, पश्चात्तु निगमनेन सह विपक्षेबाधकप्रदर्शनमि-त्यन्वयप्रकरणमिदं मांत्रवर्णिकमेवच गीयतइति महाप्रकरणप्रदर्शने-नोपक्रमोऽप्युक्तइति तदपि लिंगं संसूचितं भवति पुच्छवादे अथेदा-नीं व्यतिरेकमाह । नेतरोऽनुपपत्तेः, भेदव्यपदेशाच्चेति, इतरो जीवो नानन्दमयः आनन्दमयो नविवक्षितः, अनुपपत्तेरित्युभयत्र समानं, यद्यानन्दमयएव विवक्षितस्तदा तं प्रकृत्य ततोऽन्यत्वेन तत्प्राप्यफल तया किमर्थं पुच्छं विस्पष्टमुपदिशेत्, नच विशिष्टफलभाक्त्वेन तम्प-हीकरोतीति वाच्यं, तथासत्ययमेवहि रसं लब्ध्वानन्दी भवतीति व-क्तव्यमिति अयमितिच प्रकृतमानन्दमयमेवहि परामृशतीति पुच्छ-वादस्यैवानुगुणस्सूत्रार्थः, परपक्षे बाधकप्रदर्शनद्वारा फलवच्च पुच्छ वेदनमिति सूचितन्तात्पर्यलिंगमितरत् । वृत्तिमते फलत्वव्यपदेशा-च्चेति वक्तव्यं नहि रसिकएवायमानन्दमयइत्यभ्युपगच्छन्तंप्रति नहि लब्धैव लब्धव्योभवतीतिसन्तर्जयितुं शक्यमिति न तन्मतानुगुणं सूत्रं, अत्र विपश्चिदपश्चिमेन श्रीभाष्यकारेणैवं विवृतं, ननु मांत्रवर्णिकमपि जीवादनतिरिक्तमेव यत्तस्यैव निर्विशेषं शुद्धं स्वरूपन्तदेव यतो ब्र-ह्मेत्यतआह–नेतरइति कुतइति चेदाह-अनुपपत्तेरिति, अनुपपन्नं हि तस्मिन्निर्विशेषे मन्त्रोक्तं विपश्चित्वं, विविधं पश्यच्चिद्धिविपश्चित् पृषोदरादित्वेनयलोपात्, तत्वञ्च विपश्चित्वन्न कुतश्चिदपि कारणादु-पपद्यते निर्विशेषइति, तदिदमुपपादितस्यैव स्वपक्षे वक्तव्या पक्षान्त-रेऽनुपपत्तिः, नहि विपश्चित्वं पूर्वमुपपादितमानन्दमयस्य अनुपपत्ते-र्नमांत्रवर्णिको जीवः भेदव्यपदेशाच्च नानन्दमयस्सइति क्रमभेदः' निर्विशेषेऽपि जीवभावइव विपश्चित्वमपि क्वचित्कुतो नस्यादितिचा-समञ्जसं, यत्तु तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तरआत्मान-न्दमयइति जीवाद्भेदेन व्यपदिशत्यानन्दमयमिति द्वितीयसूत्रविवरण

न्तदप्युक्तरूपाश्चेति कुतो नोक्तमित्याक्षेपपराहतं । ततस्तु मास्त्वान-
न्दमयो विवक्षितः, किन्त्वस्तु प्रधानं विवक्षितमिति सांख्याशङ्कामा-
शंक्योक्तं कामाच्च नानुमानापेक्षेति । अनुमानापेक्षाच न अनुमानत्वा-
त्, कामाच्च, नह्यनुमानं विवक्षितं स्यात्, पूर्वत्वात्, अपूर्वोहि शास्त्रा
र्थः, कामाच्च, नह्यनुमानं कामयेत, जडत्वात्, अतस्तदपेक्षा, तदा-
शाच नकर्तव्या, यथाजीवापेक्षा, प्रत्यक्षत्वाज्जीवस्य, विलक्षणात्का-
माच्च, अतस्त्वयाच नानुमानापेक्षा कर्तव्या यथा पूर्वमीमांसकेन जी-
वापेक्षेत्यपूर्वत्वं सूचितं भवति तात्पर्यलिंगं । काममात्रेण सृष्टिश्रव-
णान्नानुमानप्रधानादिपदाभिधेयाच्चित्संसर्गापेक्षाऽनन्दमयस्य सर्ग-
इति प्रतीयते, जीवस्यतु हिरण्यगर्भादेरस्ति तदपेक्षासर्गइति नानन्द
मयो जीवइति श्रीमान्, इदन्तु प्रथमतः क्लिष्टं । प्रकृतेः स्वरूपतो वि-
यदादिनान्यथाभावउत्पत्तिः, जीवस्यतु धर्मभूतज्ञानविकासः, तदु-
भयविशिष्टत्वमेव परस्य स्रष्टृत्वमिति स्वाभ्युपगमविरोधश्चेत्यसम-
ञ्जसं, प्रत्येकं पराकृतयोरनुक्षणमेव युगपत्पराकृतिरप्यावश्यकीत्ये-
तदपि त्यक्तं भवति, नह्यप्यनुमानपदेन प्रधान प्रतिपादनं पश्यामो
वेदइतिच, ततस्त्वीक्षणमपि गौणयतः कामो मउदपानसमः, भवतिच
पूर्वोऽपि शास्त्रार्थइत्याशङ्क्यं प्रत्याह अस्मिन्नस्यच तद्योगं शास्तीति ।
अस्मिन्पुच्छे ब्रह्मणि अस्य आनन्दमयस्य यादृशो योगस्सद्विद्याया
मुपदिष्ट इति तन्निष्ठस्येत्युक्तस्त्वांप्रति पूर्वन्तादृशमभयपूर्वकं योगं प्र-
तिष्ठामनन्यव्यापारेण वर्त्तनं शास्तीदश्च शास्त्रमिति स्मारयित्वा शा-
स्ति सांख्यं सूत्रकारः अत्र अस्मिन्नानन्दमये अस्य जीवस्य तस्या
नन्दस्य योगन्तद्योगं शास्ति रसस्यैवायं लब्ध्वानन्दी भवतीति शा-
स्त्रमिति श्रीमान् अत्र किन्नामास्ति शासनं, अत्रहि पुच्छत्वेनावता-
रितम्मांत्रवर्णिकं ब्रह्मसत्वासत्ववेदनस्तुतिनिन्दापूर्वकं सकलजग-
त्स्रष्टृत्वेन परोक्षतया प्रसाध्याध्यात्मं सर्वप्राणिप्राणनादिहेतुतया
ऽनन्दपदेन प्रतिनिर्दिश्यरसतया साक्षात्क्रियते सर्वैरप्यन्वहमिदमिति

साधयति, अस्माभिरुदाहृतन्तु यदाह्येवैषएतस्मिन्नभयं प्रतिष्ठां विन्दतेऽथ तदासोऽभयं गतो भवति तस्मादवश्यं विन्देतेति शास्ति । एवंसति कोऽहि नामैतदेवं व्याकुर्याद्विना श्रीरामानुजं सोऽपि किमर्थमेवं व्याकुर्यादसति भगवत्पादीये भाष्ये, नन्वास्तामेतत्सर्वं, प्रधानादिव जीवादपि व्यावर्तनीयं हि ब्रह्म, बाढं, तर्हि नास्ति जीवाव्यतिरिक्तं कारणं ब्रह्मेत्येवाक्षिप्य साधनीयमितिचेन्न अर्थसिद्धेः, सिद्धं ह्यर्थतोऽन्यत्वंजीवाद्ब्रह्मणो निखिलजगज्जन्मादिहेतुरीक्षितृसत्पदाभिधेयमात्मा ब्रह्मेति साधिते तादृशं सर्गमेवानभ्युपगच्छन्तमभ्युपगच्छन्तमपि जडादेव तमभ्युपगच्छन्तश्चप्रति । सिध्यत्येव ह्यर्थात्त्वया गतिसामान्येन ब्रह्मसिषाधयिषितन्तच्च क्वचिज्जीवे गतिदर्शनादसिद्धमित्याक्षेपेण ब्रह्मासिद्धिप्रसंगस्य निराकरणेच जीवादन्यत्वं ब्रह्मणइति, एवञ्चानेन फलसाधनशासनोपन्यासेनाद्यलिङ्गव्यतिरिक्ततात्पर्यलिङ्गपञ्चकमुत्तंभितं, लिङ्गपञ्चकसद्भावेनाद्यलिङ्गेनापि भवितव्यमिति वृत्तिमतं, तच्चार्थान्तरविवक्षयाऽर्थान्तरोपक्रमस्य बहुळन्दृष्टतया ननियन्तुं शक्यतइति पुच्छब्रह्मवादेन निराकृतमिति संक्षेपः ।

किञ्चात्र पञ्चात्मानः प्रदर्श्यन्ते, कस्यैत, विज्ञानमयस्येतिचेत् कुतोऽन्नमयस्य नस्यात्, मनोमयस्यवा मध्यमस्य अथवानन्दमयस्यान्तिमस्य, अथसएवाधिकृतश्शास्त्रेषुजीवः तस्य त्रयोगौणात्मानः, स्वयन्तु व्यावृत्ताकारो मुख्यस्स्वस्य पञ्चमस्तु स्वपरसाधरणो मुख्यआत्मेति चेन्न–यतो नैकस्य बहवआत्मानो भवन्ति अतः पञ्चमोवा षष्ठोवा यस्सर्वात्मा शास्त्रप्रतिपाद्यस्सएकएवात्मा, अन्येनात्मानइति मन्मतमेव वरं, नन्वेवं पुच्छवादानुगुणेषु सूत्रेषु कथं सूत्राणि त्विति भाष्यं गुणेत्वन्यायकल्पनेति भामती, अग्नीषोमीये पशावेकपाशके अदितिः पाशान् प्रमुमोक्त्वेतानिति मन्त्रोक्तस्य बहुत्वस्यानन्वयेनोत्कर्षे प्राप्ते–विप्रतिपत्तौ विकल्पस्स्यात् समत्वात् गुणेत्वन्याय्यकल्पनैकदेशत्वात्–उत्कर्षानुत्कर्षयोर्विप्रतिपत्तौ अदितिः पाशं प्रमु-

मोक्त्वेतमिति मन्त्रेणास्य विकल्पस्स्यात्, समत्वात् प्रधानपाशप्रतिपादकस्य प्रातिपदिकस्य गुणेतु पाशविशेषणत्वेन बहुत्वप्रतिपादके श्रसितु अन्यार्थकल्पना पाशावयवबहुत्वे लक्षणाकल्पना प्रातिपदिकपरतन्त्रैकदेशत्वात् प्रत्ययस्येति न्यायेन तदुपपादककल्पतरुश्च संगच्छतामितिचेत् न यतस्सर्वोऽयं यत्नस्स्वमते सूत्रानुगुण्याभावाशङ्कया नोपात्तः, किन्तु सौत्रपदे लक्षणाश्रयणभीरुं वृत्तिकारं व्युत्पादयितुं अथ सूत्रकारेण वा किमर्थं लाक्षणिकं पदमुपात्तमानन्दमयइतिचेत्-लक्षणयैव प्रतिपादयति श्रुतिश्शुद्धं ब्रह्मेति द्योतयितुमिति गृहाण । यद्येवं प्रियशिरस्त्वाद्यप्राप्तिरिति सूत्रं कृत्वाचिन्तेयमिति भाष्यञ्च कथं संगच्छतामितिचेत्, एवं, यदि कश्चित्पाशुपतोवा पाञ्चरात्रो वाऽऽनन्दमयो ब्रह्मेति ब्रूयात् तदा तेनापि प्रियशिरस्त्वाद्यप्राप्तिरेष्टव्येति, तथाच तन्मतन्नयुज्यतइत्यर्थः, एवञ्च सूत्राणामनेकार्थत्वस्यालंकारत्वेन आनन्दमयो ब्रह्म अभ्यासादित्यारभ्य तद्धेतुव्यपदेशाच्चेत्यन्तेन तान्त्रिकपक्षे प्राप्ते मान्त्रवर्णिकमेवच गीयते, चस्त्वर्थः पक्षं व्यावर्तयति, नेतरोऽभ्यस्यते, तत्र सत्वासत्वशङ्कानुपपत्तेः, अतो नब्रह्म सइति कोऽपि प्रकारउन्नेयो भवतीति । अथ कथं प्रत्यगभिन्नस्य ब्रह्मणआनन्दरूपत्वं, इष्यमाणस्यैव तत्वात् सिद्धस्य प्रत्यगात्मनस्तदभावादितिचेन्न स्रक्चन्दनादीनामपीष्यमाणत्वेन सुखत्वापत्तेः, नन्वन्येच्छानधीनेच्छाविषयस्सुखं स्रगादिस्तु सुखेच्छाधीनेच्छाविषयइति कुतोऽयन्दोषइतिचेन्न, सुखस्याप्यात्मार्थत्वेनेष्यमाणत्वात्, नन्वात्मवृत्तित्वेनेष्यमाणमपि नतादिच्छाधीनेच्छाविषयइति कुतो दोषइतिचेन्न उत्तरकालात्मसंबन्धेच्छाधीनत्वात्सर्वासामपि, नहि सुखंवा सुखसाधनंवा तत्वेन भूयादितीच्छति कश्चिदपि, किन्तु सर्वमपि मे भूयादिति, तत्र सदातनीम्मानभूवं हि भूयांसमितीच्छामन्वेवान्यदिच्छति मे भूयादिति सर्वोलोकइति को विशेषस्सुखस्य तत्साधनादात्मनोन्यत्वइति ।

तदेवं-सूत्रकल्पद्रुमारूढाब्रह्मवल्ली विसृत्वरी ।
भाष्यवृन्तसुसम्बद्धप्रबोधसुमभामती ॥
कल्पद्रुमसमाश्लेषात्कल्याणफलदायिनी ।
प्राप्नोति परमं विष्णोः पदं परिमलान्विता ॥
नष्टेऽहि लोकनिवहे निटिलेक्षणात्ते
शिष्टोऽथ शङ्कर मुदा यदि नृत्यसि त्वम् ।
स्पष्टोऽवशिष्टविषये श्रुतपुच्छशब्दः
कष्टेतरेण विधिना शिव कुत्र नेयः ॥

इत्यानन्दमयाधिकरणम् ।

---

## ७ अन्तस्तद्धर्मोपदेशात् ।

## ८ भेदव्यपदेशाच्चान्यः ।

यदेवोपाधिविलयावशिष्टं सत्पुच्छन्तदेवोपाधिविशिष्टन्ततोऽन्यदिवोद्भूतं सदुपास्यं, उपाधियोगश्चास्मिन् सत्यपि यस्मिन्नुदेवोपाधेस्स्यात् ब्रह्म, नतु तत्र विलीनन्तमेव शास्त्युपदिशति शास्त्रं, अन्यएवायमुपास्यः पुच्छाच्च जीवाच्च, यतउपदिश्यन्तेऽत्र धर्मास्तस्यैवोपास्यत्वाय, नतूच्यन्तएव केवलमदृश्यत्वादिगुणकइव व्यपदिश्यतेचाक्षजीवाद्भेदेनेत्यादिकमत्र भाषितं स्यादीश्वरस्यापीत्यादिना-नन्वस्त्वेतत्-तस्येति सिद्धौ हि तस्यैवेति स्यात् कोऽयमेवंविधो धर्मः, कथमस्य तद्धर्मता, श्रुत्यन्तरादिति चेत्तदाऽऽनन्दतया परं किमपराद्धं, तत्र कथन्तत्साधनायैव पूर्वाधिकरणमित्यवोचइति चेन्न सिद्ध्यसिद्धिभ्यां विशेषात् अयंचात्र धर्मउपदिश्यते यस्सर्वपाप्मोद्गमः, यश्चर्क्सामगेष्णत्वादिनोन्नीयमानस्सर्वात्मभावः, याच निखिललोककामेशतेति तत्र सिद्धोहि, सर्वपाप्मोद्गमो धर्मो नपाप्मपरतन्त्रस्य भवति जगज्जन्मादिहेतुतेति, सर्वात्मभावश्च जगज्जन्मनिमित्तो निखिललोककामेशताचावनहेतुभूता, नचैवमानन्दरूपता सिद्धा । नहि

जगज्जन्मादिहेतुना चेतनेनाप्यानन्दात्मना भवितव्यमित्यस्ति निर्बन्धः केनापि तस्य तथात्वानंगीकारात्, आवृतत्वाच्च, आवृताह्यस्माकमानन्दात्मता, यतस्सर्वेऽपि वयं यतामहे प्रत्यहमुपर्युपरि सुखार्थं अतस्साध्यावस्थमेव तत्वं कारणस्येति किञ्चित्परप्रकरणमादाय साधनीयमेवेति, एवञ्च तस्यैव संभवद्धर्मोपदेशादिति हेत्वर्थः पर्यवस्यतीति । ननु तस्यैषएव शारीरआत्मेत्युक्तं शेषितया नतुप्रकरणितयेति प्रत्याख्यातञ्जीवत्वमानन्दमयस्य, तन्नयुज्यते, हिरण्यश्मश्रुत्वादिविशिष्टविलक्षणशरीरस्य चतुर्मुखत्वादिविशिष्टस्येव कर्मकृतत्वप्रसिध्या यथाऽयमुपकरण्येवान्तरस्तथैवानन्दमयोऽप्यान्तरइत्याशंक्य शेष्येवोभयत्र, विलक्षणन्तु शरीरमप्राकृतमैच्छिकमिति समादधाति, तथाच पूर्वशेषएवेदमधिरणमिति श्रीभाष्यं, तत्तु पूर्वाधिरणाक्षेपाय प्रवृत्तस्य पूर्वशेषत्वे सर्वत्राप्येवंविधा रीतिः कथंचित्संपादयितुं शक्येति सर्वमपि पूर्वशेषएव स्यात्, तत्र कथमत्रैव पूर्वशेषत्वकथनमिति नस्वरसं, कथन्तन्मते नित्यत्वादस्य शरीरस्येच्छिकत्वमितिच तदेवं—

कप्यसपुण्डरीकाक्षं घर्मरश्म्यन्तरास्थितं ।
उम्नामानं हरिं वन्दे किन्नामास्ति ततःपरम् ॥

कामप्यहो न विजहाति पिशाचिकेय-
न्नारीं भुवि श्रुतिमपि स्पृशति ह्यसूया ।
तत्स्थानलक्षण निवेदयितुं प्रवृत्ता
दुष्टोपमेयपदएव तयैव सेयम् ॥

यस्यैकमत्र नयनं कपिपृष्ठभाग-
तुल्याम्बुजेन सदृशं स हरः परोऽयम् ।
यस्योभयं स च हरिः परएव साक्षा-
त्तावप्युभौ हरिहराभिधमेकतत्वम् ॥

इत्यन्तराधिकरणम् ॥

अस्ति सर्वोपाधिविनिर्मोकेऽपि ब्रह्म, दृश्यते चाध्यक्षमन्तररप्युपाधेरुपासकैरधिदैवमादित्येऽध्यात्ममक्षिणिच विलक्षणनामरूपविशिष्टतयेति श्रूयते, अतस्तद्युष्माभिरपि यथा दृष्टञ्च श्रुतञ्च स्यात्तथोपासितव्यमित्यनुशासन्निव सिद्धस्य प्रसिध्यर्थं प्रवर्त्तयत्युत्तरमधिकरणत्रयं, प्रसिद्धिश्चाप्यात्यन्तिकी यथाश्वमेधाद्विना समाराध्यदिव्य मंगळविग्रहवत्वेनात्मतनयतयावतारितस्यश्रीरामइतिकृतनामकरणस्य प्रसिद्धस्यैव भगवतो विश्वामित्रस्य मखमुखेनोपपादिता श्रीमता दशरथेनैवमेव द्रुतकनककमनीयकळेबरतयावतार्योदिति कृतनामकरणस्याधिमखमुद्गीथप्रस्तावयोरधिच्छन्दोगायत्रीमहामन्त्रस्यच संबन्धनिबन्धनेनैवोपपादिता सिध्यन्ती सिध्येदिति मन्वानः प्रवर्तते 'आकाशस्तल्लिंगा' दित्यादिनाधिभूतं प्रसिद्धतरपदलाक्षणकीकरणेन,एतदेव सूचयति भूतविशेषे तावत्सुप्रसिद्धइति तद्धि प्रसिद्धतरेण प्रयोगेणेतिच भाष्यकृत्, अथ कथमेव मवगम्यते प्रसिध्यर्थः पादशेषइतिचेत् यतआरप्स्यते सर्वत्र प्रसिद्धोपदेशादित्युत्तरं पादमिति गृहाण, अन्य एवायं यथाश्रुतात्प्रसिद्धादाकाशादत्र प्रतिपाद्यमानआकाशः, यतस्तस्यैवात्र लिंगंव्यपदिश्यते प्रसिद्धाकाशसंबन्धिनो लिंगात्सर्वभूतकारणत्वादिकाद्भिन्नमिति भाष्यात्प्रतीयमानोऽत्र सूत्रार्थः अस्योपक्षेपायचान्यइत्यधिकोक्तिः पूर्वाधिकरणावसानइति विभावनीयं । एवञ्चान्यशब्देनापीदमेव प्रतिमाद्यते वेदान्ते, यदि सर्वभूतकारणत्वादिना प्रतिपाद्यतइति प्रसिद्धिरुपपादिता भवति सूत्रकृता, न पुनस्साधितमेव पुनःपुनःपरावर्त्यसाध्यतइत्येतदनुक्षणमेव निपुणतरमुपपादयिष्यामः, लिंगाल्लिंगान्तरबाधनेऽपि तेन नश्रुतिबाधनमित्यस्य प्रवृत्तिः, अत्र उभयत्र प्रयोगदर्शनात्संशयइति भाष्यं, रूढिनिरूढप्रयोगाभ्यामिति तद्विवरणात्मकः कल्पतरुः, श्रुत्या लिंगस्याननन्यथासिध्याचेति न्यायरक्षामणिः— प्रसिध्यतिशयपरायणत्वाद्यनुपपत्तिभ्यां संशयः । उभयत्रप्रयोगदर्शनादित्युक्तं परैः । तद-

युक्तं अश्रुतवेदान्तस्य परत्रेवात्रापि परमात्मविषयत्वाप्रतिपत्तेः इतरस्य संशयाभावाच्चेति सुदर्शनः । अस्त्वेतत्, अत्रपरोवरीयस्त्वमुपपाद्य तद्विशिष्टत्वेषेणोद्गीथे ब्रह्मसंपाद्यप्रसिद्धिरुपपाद्यते परोवरीयस्त्वंचाप्रतिष्ठितत्वान्तवत्व दोषास्पृष्टं परायणत्वानन्तत्वोभयापेक्षं । उभे अपि ते कुत्रापि कदापि स्वासत्वाभावाय सर्वभूतज्यायस्त्वस्रष्टृत्व संहर्तृत्वान्यपेक्षेते इत्येतत्सर्वं यत्र प्रसिद्धं लोकानान्तत्पदेनोपादाय ब्रह्म तत्र समर्प्यते भगवत्या श्रुत्या । तत्रैवंसति, किमत्र परावर्त्यते ब्रह्मवादोनास्ति कारणं ब्रह्मेति, उताहोभूतमप्यवान्तरकारणमिहोपदिश्यते परोवरीयस्त्वेनोद्गीथे संपाद्योपास्यत्वायेतिपूर्वः पक्षइति विवेक्तव्यं । ननु परावर्त्तनमेव, यतआह श्रीमांल्लक्ष्मणार्यः अतआकाशादनतिरिक्तंब्रह्म, नन्वात्मनअकाशस्संभूतइत्याकाशस्यापि कार्यत्वं प्रतीयते, सत्यं, तस्य तु स्वस्मादेव सूक्ष्मरूपात् स्वयं स्थूलरूपस्संभूतइत्यर्थइति, न तल्लिंगादिति सिद्धवद्धेतूपन्यासायोगात्, तथाहि ब्रह्मशब्दस्तु यौगिकः, अयन्तु भूते रूढो विशेषसमर्पकः, अयश्चाकाशो नित्यो विभुश्चेति कणादादयः, ततश्चैतदनुगुणमेव नेयं वाक्यं सर्वमपीति प्रत्यवस्थाने कथं ब्रह्मणएव लिंगादिति हेतूकर्तुं युक्तं, नहि सांख्यपरीक्षायामेवमुक्तमिति, नच सर्वाणिहवाइति प्रसिद्धवन्निर्देशात्पुरोवादानुगुणमेवेदन्नेयमिति सूत्रार्थइतिचेन्न अवधारणात् अवधिग्रयतह्याकाशादेवेति, तथाच यदुक्तं यतोवा इमानि भूतानि जायन्तइत्यादिसामान्यतस्तत्सर्वमाकाशादेवेत्युक्तं, तथाहि सर्वाणिहवा इमान्याकाशादेव समुत्पद्यन्तइत्यर्थावलम्बने नहि प्रत्यवस्थानं, तत्र कथं पुरोवादानुगुण्येनास्यनयनं विशेषसमर्पकस्य किंचैवं परावर्त्तने सर्वत्राप्येवं कर्त्तुं शक्यते, परिहारोऽप्येवमेव युज्यतइति कथमयोगान्ययोगव्यवच्छेदाभ्यां फलभेदः, नचोदाहरण धोरणीभेदेन पादभेदफलभेदाविति वाच्यं कुतः उच्यते, एतावतापि किमुक्तं भवति, नन्वाकाशमेव कारणमुच्यते, संभवति चात्रोच्यमानं

सर्वमपि यथाश्रुतमेवाकाशे, ब्रह्मवाक्यमपि सर्वमविरुद्धमेव भवति, नेयंचाविरोधेन शब्दबलादिति प्रबलं पूर्वपक्षयति पूर्ववाद्यत्र, उत्तरत्र त्वस्त्वब्रह्मापि कारणमिति, तत्र कथं भोस्तल्लिंगादिति वचनमात्रेण पराणुद्येतभूतवादी, अहह मत्तेभकुंभमर्दनम्मालतीकुसुमेन, मत्कुणमर्दनन्तु महामहीध्रप्रयोगेणेति केयं विषमाहष्टिर्लक्ष्मणाचार्यस्य, ततो विहायमविरुद्धं स्पष्टब्रह्मलिंगकएवायं पादइत्येवाभ्युपेत्यन्तेनेति अथास्तु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेर्भूतान्तरापेक्षया ज्यायस्त्वादीनामप्युपपत्तेस्तदेवोपास्यं शब्दोपात्तमित्युत्तरः पक्षइतिचेन्न समन्वयाक्षेपात्, यदि प्रतिहारादावादित्यादिरिवेदमप्युद्गीथेसंपाद्योपास्यन्तदा तथैवास्तु का नो हानिस्समन्वयस्येति, नचास्तु तत्वनिर्धारणं प्रयोजनमिति वाच्यं, अनवसरात्, अनुनिष्पत्तेश्च, समन्वयसमर्थनं ह्यत्रसरप्राप्तं, समर्थितेच तस्मिन् स्वयमेव निष्पद्यते तत्वनिर्धारणमिति अत्रोच्यते यत्र मात्रयाप्यस्ति ब्रह्मलिंगन्तत्रास्पष्टब्रह्मलिंगकेऽप्यब्रह्मलिंगाद्वा शब्दाद्वा ब्रह्मलिंगस्य बाधनेऽब्रह्मापि शास्त्रे ब्रह्मसमकक्ष्यं स्यात्, तच्चानिष्टं यतोब्रह्माब्रह्मणोस्समसत्ताकत्वे श्रुतितात्पर्यविषयस्याद्वैतस्य बाधस्स्यात्, प्रकृतेत्वस्ति स्पष्टमेव ब्रह्मलिंगं, अतोऽब्रह्मशब्दानुगुण्येन न तस्य संकोचइति ।

अथ केयमनन्यथासिद्धिः, यद्बलाल्लिंगं श्रुतिं बाधते, नच साधारण्यं, असाधारण्येऽप्यार्थवादिकत्वं वाऽन्यथासिद्धिः । तदभावस्सेति वाच्यं, एवन्तर्हि स्वयमेवान्यथाभवतो लिङ्गस्यबाधिका श्रुतिरिति भवति । तत्र किन्नामप्राबल्यं श्रुतेः नच साधारणस्य पक्षे बाधकत्वं प्राबल्यमिति वाच्यं । साधारण्यात्, साधारणंहीदं लिंगेन एष सीतापतीरामइत्यादौ तथादर्शनात्, नचाग्निरधीतेऽनुवाकमिति वत्कथञ्चिदप्यनुपपन्नत्वं सेतिवाच्यं । प्रकृतेसंकुच्योपपद्यमानत्वात् । नचान्येषां संकोचसंभवेऽपि कारणत्वस्य नसंकोचस्संभवतीति वाच्यं । विनापि संकोचं पूर्वपक्षभाष्ये तदुपपादनात् भूताकाशस्यापि

वाय्वादिक्रमेणकारणत्वोपपत्तेरिति तत्राप्याकाशादिक्रमेणैव ब्रह्मणः कारणत्वस्यवान्यत्वादित्यभिप्रायकतया, तथाचभूतपदं प्राणिपरमिति भाष्यात् प्रतीयते। तत्र कुतस्सर्वशब्दसंकोचइति। अथ यद्यपि पूर्वपक्षिणैवमुपपाद्यते, सिद्धांती तु नोपपद्यतएवेत्याह, यतआह मूलकारणस्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं सर्वाणीतिचभूतविशेषणन्नानुकूलंस्यादिति, अयमाशयः नायमेवकारोऽन्ययोगं व्यवच्छिनत्ति, किन्त्वयोगं। तेननक्रमिकं कारणत्वमिहशब्दार्थः किन्तु साक्षात्, तच्च भूतसामान्यंप्रति। तत्तु शब्दपक्षे मूलकारणापरिग्रहान्नोपपद्यते, आकाशस्यवायुंप्रति साक्षात्कारणत्वेऽपि तेजआदौ वाय्वादिनाऽन्यथासिद्धेः, यथाकापालिकस्य घटादौ कपालादिना, परिहृत्यशब्दं ब्रह्मणः परिग्रहेतु तस्य तत्तत्तादात्म्यापन्नस्य संभवति भूतसामान्यंप्रत्येवकारणत्वं, यथामृदः कापालिककपालघटादिकंप्रतीति, तथाच कथंचिदप्यनुपपन्नत्वमेवसेतिचेन्न। एवंभूतादेवलिंगाच्छ्रुतेः प्राबल्यस्यवक्तव्यत्वात्, नहि स्वयमेवापसरतो विद्रावणेन भवति कश्चिद्बलीयान्, प्रकृते तु ब्रह्मणः प्रथमजेगगने कथंचिदुक्तस्याप्यर्थस्य संगमनसंभवात्, शीताळोरध्यापकस्य समीपगेचटचटात्कुर्वत्यग्नावपि कथंचिदनुवाकाध्ययन नयनसंभवाच्च। अथ कंथ वर्णिनमभिप्रेत्य प्रयुक्ते कथंचिदपि संगमनसंभवइतिचेन्न। तथा सत्यभिप्रायस्यैवानन्यथासिद्धिप्रयोजकत्वापत्तेः। अस्तुकानोहानिरिति चेन्न प्रकृतेभूतेऽप्यभ्यासदर्शनात्, नन्वभ्यासापेक्षया प्रबलमुपक्रमोपसंहारात्मकमानन्त्ये तात्पर्यलिंगन्दृश्यते, इदमेवोक्तमपि चान्तवत्वदोषेणेत्यारभ्य संपाद्योपसंहरति, तच्चानन्त्यं ब्रह्मलिंगमित्यन्तेन भाष्येण। अतएवेदमेकमेवलिंगमनन्यथासिद्धमिति सौत्रमेकवचनमिति न्यायरक्षामणिरपीति चेन्न। तुल्यत्वात्। तुल्यएवह्ययन्न्यायोऽब्रह्मलिंगस्यापीति, अस्तु कोदोषइति चेन्न। तथासति यत्र मात्रयाप्यस्ति ब्रह्मलिंगमिति पूर्वोक्तनियमभंगापत्तेरिति, न, पृथगारं-

भात्, पृथक्तयारभ्यते चरितार्थमपि पूर्वन्यायेनेन्द्रप्राणाधिकरणं ब्रह्माब्रह्मानेकशब्दलिंगसमवायेऽपि ब्रह्मलिंगमेवेतरबाधकमिति विलक्षणन्यायप्रदर्शकं । तदेतदर्थंच । पुनःकिमर्थंच । तत्तु तत्रैव वक्ष्यते, यदत्र स्वस्मादेव सूक्ष्मरूपात् स्वस्य स्थूलरूपस्येत्युक्तं श्रीमता, तदाकाशस्यापि वायोरर्थान्तरत्वबाधकं, कारणस्य कार्यसूक्ष्मरूपत्वात्, अतस्तदापातदर्शनायातं, यत्तु सुदर्शनेनोक्तं भाष्यमयुक्तमिति तत्तु तदीयदुर्दर्शनायातं, नह्यश्रुतवेदान्तस्यवा सुश्रुतवेदान्तस्यवात्र संशयः, किन्त्वन्तराधिरणान्तमवधृतवेदान्तस्य, भवताप्युक्तन्यायापवादार्थमेवमेव वक्तव्यत्वात्, भाष्येऽप्यानन्दमयाधिकरणावलंबेन यदेष आकाशआनन्दइति, अन्तरधिकरणावलंबेन आकाशोवै नामनामरूपयोर्निर्वहितेतिच भाषणात्, भवता पुनस्सर्वमपि यथाश्रुतमेव गगने संभवतीति पूर्वपक्षयता लिङ्गस्यानुपपन्नत्वन्नकोव्यन्तरोत्थापकतया समर्थयितुं शक्यं, नहि ब्रह्मणोऽन्यत्रानुपपन्नमिदं लिङ्गं, शब्दस्त्वाकाशेरूढः, अतआकाशादनतिरिक्तंवा ब्रह्मातिरिक्तंवेति कश्चित्सन्दिग्धे, किन्त्वाकाशोवा ब्रह्मवास्य विषयइति सर्वस्संदिग्धे, किञ्चात्मनआकाशस्संभूतइत्यत्रात्मशब्दस्याकाशादनतिरिक्तार्थत्वनिश्चयेसर्वभूतकारणत्वरूपलिङ्गस्याकाशउपपन्नत्वनिश्चयः, सत्यस्मिन्निश्चये शब्दात् ब्रह्मण्याकाशादनतिरिक्तत्वनिश्चयइत्यहो महदिदं पाण्डित्यं प्रदर्शितं भवद्भ्यामाचार्यान्तेवासिभ्यां परस्पराश्रयदुष्टं पूर्वपक्षं प्रणयद्भ्यामित्यलमधिकेन । एवमुपहितं ब्रह्मलक्षयित्वा तत्र स्थितिप्रयुक्तं परोवरीयस्त्वमुपपाद्य तद्वत्तयोद्गीथे संपादितं । तदिदं स्थितिप्रयुक्तं परोवरीयस्त्वमित्येतत् रातिर्दातुः परायणमिति श्रुतिमुदाहृत्य परायणत्वमुपपादयता भाष्येण प्रदर्शितं ।

तदेवं....आकाशतो जगदुदाहरति स्म तास्थ्या-

दाकाशशब्दमपि तत्त्वमसीति शंभो ।

आकाशमध्यइति, ते वसतिं वदन्ती-
मन्यां श्रुतिं श्रुतिरियं, हि परिष्वजन्ती ॥
इत्याकाशाधिकरणं ।

---

॥ अतएव प्राणः ॥

अत्र सर्वभूतकारणत्वस्यैवातइति परामृष्टतया तल्लिङ्गादिति सौत्रमेकवचनं प्रत्येकमेव साधकमित्यभिप्रायेण भूतत्वावच्छिन्नकार्यतानिरूपितसाक्षात्कारणताया भूताकाशेऽसंभवात्, न्यायरक्षामणिस्तु कथञ्चिदितरेषां संकोचसंभवेऽपि नानन्त्यं सहते संकोचमित्येवमभ्युपगमवादेन, अत्र प्रळयप्रधानं ब्रह्मप्रस्तावे संपाद्योपास्यतया निर्धार्यते, यतः प्राणमेवाभिसंविशन्तीत्युपक्रमवती-श्रुतिरत्रोदाहियतइति । अस्मिन्प्रकरणे उद्गीथप्रतिहारयोरन्नादित्या-वब्रह्मणीदेवतात्वेनोक्तौ, तद्वत्प्राणोप्यब्रह्मैव ग्राह्यइतीदं भाष्येऽनादृतं । प्रकरणोक्तानामन्नमयादीनामब्रह्मत्वेऽपि कारणस्यानन्दमय-स्य ब्रह्मत्वं समर्थितमिति प्रकरणमात्रस्य पूर्वपक्षावलंबनत्वेन बुद्धावनारोहादिति सुदर्शनः । तदिदमसंगतं, आकाशवाक्यगतमपि लिङ्गमाकाशे संभवत्येवेति पूर्वमपि पूर्वपक्षयित्वा न संभवतीति सिद्धान्तिते तत्रासंभवेऽप्यत्र संभवतीति प्रत्यवस्थाने तद्वत्प्रसङ्गभिया प्रकरणस्यापि भवतस्समुच्चेयत्वात्, पूर्वपक्षावसरे लिङ्गस्य ब्रह्मासाधारण्यानिश्चयेन तेनात्र प्रकरणस्य बाधायोगात्, आनन्दमयाधिकरणे सिद्धान्तसाधकस्य साधारण्याशङ्काभावात्, अस्मद्भाष्येऽपि प्रकरणमात्रस्यानालम्बनात्, केवलशब्दबलात्संकोचस्य बाधनेऽपि प्रकरणसचिवशब्दबलात् भूतसंवेशनोद्गमनयोर्भूतसारेन्द्रियसंवेशनोद्गमनरूपत्वमंगीकार्यमित्येवमर्थन्तत्साचिव्यस्यावश्यकत्वाच्चेति ।

तदेवं-संवृक्षेचेत्सर्वलोकानपि त्वं
संवृङ्क्षेचक्षुरादीननोऽयं ।

आनीर्वार्तापतेएवातएव
प्राणोऽस्यद्धा पञ्चवक्त्रत्वमेव ॥
इति प्राणाधिकरणं ।

---

## ॥ ज्योतिश्चरणाभिधानात् ॥

अथ पादाभिधानादित्यनभिधाय चरणाभिधानादित्यभिधाने को हेतुः, पादोऽस्य सर्वाभूतानीति पादाभिधानं हेतुः, तथाच भाष्यं पादाभिधानादित्यर्थोऽयमर्थो लब्धइत्यर्थकं, ननु किमुत्तरमभिहितं भवता मम प्रश्नस्य, इदमुत्तरमभिहितं, यत्सर्वभूतपादेनोन्मितं ब्रह्म ततस्तेषां यच्चरणं संसरणन्तद्ब्रह्मणएव । अंशेन सर्वभूतात्मकं सद्ब्रह्मैव संसरतीत्यर्थइति तथाच श्रौतः पादशब्दश्चरणशब्देन व्याख्यातः नह्युन्माने चरणशब्दः प्रयुज्यते लोके किन्तु चरस्य गमनसाधने, एवञ्च, चरसामान्यं पादत्वेनोक्तमिति द्योतयितुं चरणाभिधानादित्युक्तमिति वेदितव्यं एतेनैवं हि ब्रह्मप्रसिद्धं वर्ततइति प्रसिद्धिरुपपादिता भवति, वाक्यान्तरगतेन ब्रह्मलिङ्गेन वाक्यान्तरस्य तत्परत्वसाधनेन सन्दिग्धवाक्यगतेन लिङ्गेन विचार्य निर्णीतान्यपि ब्रह्मलिङ्गानि गौणयन्तोऽयोगव्यवच्छेदमेव पादस्य पर्णफणन्तश्च पराकृता भवन्ति, अत्र गायत्रीद्वारा चेतोर्पणं ब्रह्मण्यवश्यं कर्तव्यमिति निगदितं भवति, यन्निरतिशयोत्कृष्टदीप्तिजुष्टमुपहितं ब्रह्म समन्वयविषयतया पादस्य पर्णायितन्दिवीति द्युसंबन्धि दिवःपर इति तद्बहिर्भूतं शुद्धंच तदध्यात्मंकौक्षेय ज्योतिषि संपाद्य द्रष्टव्यं श्रोतव्यश्च नह्यत्र विरोधो द्युसंबन्धे तद्बहिर्भावेच, उभयस्मिन्नप्यविरोधात्, यतो वृक्षाग्रमिव श्येनस्योपाधिरेव द्युलोको ब्रह्मणः, न ह्युपाधिसंबन्धासंबन्धाभ्यामुपहितं भिद्यतइत्यादिकमुपदिष्टं भगवता वेदाचार्येणेति वेदितव्यं। अत्रोदाहरणेकारणत्वस्यानभिधानात् वंभ्र-

मीति तान्त्रिकः, यतएवमाह, अत्र कारणत्वस्यानभिधानेऽपि तद्व्याप्य मभिधीयते निरतिशयोत्कृष्टदीप्तिजुष्टत्वं, व्याप्तिग्राहकन्तु तस्य भासा सर्वमिदं विभातीति श्रावयित्वा तथाक्षरात्संभवतीह विश्वमिति श्रावकम्मुण्डकं, तथाचात्र व्याप्यावधारणाद्व्यापकस्यावधारणं यथा धूमावधारणाद्धूमध्वजस्येति । अत्रैकं परंभवति हर्षहेतुः यदि श्रुत्यन्तर मादायत्वमाक्षिपसि तदाहमपि वाक्यान्तरमादाय प्रतिक्षिपामीति यत् । परन्तु तदेव मुण्डकवाक्यं कुतो नोदाहृतमिति पर्यनुयोगे ज्योतिश्शब्दाघटितत्वादिति वक्तव्यं, चेत्किमितिचेत् अधिभूतप्रकरणं विच्छिद्येतेति वक्तव्यं, कुतो वायुस्त्यक्तइति प्रश्ने वायुविशेषत्वात् प्राणस्य नायन्दोषइत्यभिधातव्यं, अथाप्युत्तराधिकरणे गत्यभावान्नेयं कल्पना युक्तेति विभावनीयं ।

तदेवं—ज्योतिस्त्वमेव यदतःपरतोदिवोऽन्ये
देवायतो दिविषदोऽस्यथ देवदेवः ।
पादस्तवैतदखिलं भुवनं त्रिपादी
तस्याः पराप्यभिहिताश्वतरेण यस्मात् ॥

इति ज्योतिरधिकरणं ।

---

अतःपरमत्र किमवशिष्टं, अनुगमः केषां यज्जीवविशेषलिङ्गं, यश्च भूतवाचकश्शब्दः यच्च तस्यापि लिङ्गं, यच्च सैद्धान्तिकं ब्रह्म लिङ्गमित्येतेषां. अथ कथमनुगममात्राय पृथक्प्रयत्नो युज्येतासति प्रयोजनान्तरे अस्ति यज्जीवसामान्यलिंगस्य बाधनन्नाम यच्चाब्रह्मणां लिङ्गसमवायस्यच, किञ्चान्यद्वक्तव्यं, लोकदृष्टिरन्या शास्त्रदृष्टिरन्येतिचैवं विचारितवेदान्तस्य भवति शास्त्रदृष्टिरिति सूचनार्थं एवमनुगमेन निगमय्य विचारितं विचारयिष्यमाणमपि सूचनीयमुपासात्रैविध्याभ्युपगमादित्युपास्यप्रधानः पादः प्रवर्त्तिष्यतइति ।

## अत आह प्राणस्तथानुगमादित्यादि ।

यद्यपि प्राणशब्दः प्राणाधिकरणेन भग्नोत्साहः कृतः, तथा जीवलिंगमपि निर्जीवीकृतमन्तरधिकरणेन, प्राणलिङ्गमपि कैमुतिकन्यायेन निष्प्राणीकृतं प्राणाधिकरणेनैव, अथापि बहून्यब्रह्मलिङ्गानि संघीभूय ब्रह्मलिंगन्दुर्बलयन्तीति पूर्वपक्ष्याशयः, प्राणलिङ्गसहकृतः प्राणशब्दइति तेन पक्षीकरणं, भाषितमिदं सर्वं ननु वर्णितं प्राणशब्दस्य ब्रह्मपरत्वं, इहाप्यस्ति ब्रह्मलिंगमिति, अनेकलिंगदर्शनादितिच अत्र प्राणलिंगस्यापि दर्शनादिति वक्तव्येऽनेकइत्युत्कीर्त्तनं संभवत्यब्रह्मलिङ्गानां बहुविधानामप्येकत्राब्रह्मणि समावेशः, इन्द्रदेवताया बलवत्वेन जीवविशेषाविशिष्टत्वेनच जीवस्यच प्राणोपकरणित्वेन देवतात्माभिमानित्वेनच प्राणस्यापि जीवसहभावित्वेन देवताविशेषे विशेषाभिव्यक्तत्वेनच तेष्वेकोवा सर्वेअपिवा भवन्ति संभूयोपास्याः, न ब्रह्मप्राणादिकमित्याशयेन । अतएवान्तिमसूत्रेऽन्यतरोवोभौवा नब्रह्मेति भाष्यं । एतेन शब्दसाचिव्येन प्राणलिंगस्य प्रातिभट्येऽपि कथमितरस्य तथात्वं, कुतोवा नतेषामपि परस्परं प्रातिभट्यं, कुतश्चवा विनिगमनाविरहेण ब्रह्मैवोपास्य न्नस्यात् केनवा हेतुना ब्रह्माब्रह्मसर्वोपासनमेव नस्यात् तथाच कथमस्यभाष्यस्योत्थानमिति परोक्तं परास्तं । एवंप्राप्ते उक्तन्तथानुगमादिति अयमाशयः अब्रह्मलिंगान्येव दृष्ट्वा ब्रह्मलिंगं भवन्ति भुग्नग्रीवाणि ब्रह्मार्थत्वादध्यस्तानामब्रह्मणां, तथाच भगवती श्रुतिः, तदस्य रूपं प्रतिचक्षणायेति । नब्रह्मलिंगं स्वार्थत्वाद्ब्रह्मणइति । एवं स्थिते, इन्द्रप्राणादिशब्दिताज्जीवविशेषाद्ब्रह्मपृथक्कर्तुमधिकरणमिति वर्णयतां किं समाधानं स्यात् इन्द्रस्तथानुगमादितिकुतो नोक्तं सत्यपीन्द्रस्य प्रियन्धामोपजगामेति श्रवणे तस्याहंकारवादेच, अन्तरधिकरणादस्य को विशेषस्स्यादिति—अत्र वृत्तिरप्यादृता भगवता भाष्यकृतानन्तरपादावतरणसूचनाय आचार्यास्तु नानुमन्यन्ते प्रतिज्ञा-

तानुगमभंगस्स्यादेवेति, तत्र प्रसञ्जितेनैवानन्तरपादविषयोपक्षेपइत्यूहनीयं, यदातु एकविशेष्यकं बहुप्रकारकमेकमुपासनवाक्यं भेदापादकमिति समर्थयितुं शक्यते तदा वृत्त्यर्थोऽप्यनुग्राह्यएवेति ।

तदेवं—आयुर्मृकण्डुतनयाय यतो व्यतारी
रापीतवानपि गरन्नमृतो यतश्च ।
आयुर्हदेवनिवहोऽमृतमित्युपास्ते
देवं त्रिलोचनभवं तमतो महान्तं ॥

इतीन्द्रप्राणाधिकरणम् ।

---

इति श्रीमहामहोपाध्यायसर्वतन्त्रस्वतन्त्रहरिहरगुरुचरणसंसेविनो वेदान्तविभूषणस्य श्रीजगद्गुरुशङ्करभगवत्पादार्पितशास्त्ररत्नाकरबिरुदाङ्कितस्य श्रीकृष्णाख्यस्याद्वैतसभापण्डितस्य कृतौ ब्रह्मसूत्रानुगुण्यसिद्धौ प्रथमः पादः ॥

पराणुद्यभूतन्तच्छब्दाब्रह्मणि लाक्षणिकीकृताः, तेन शब्दान्तरेणाप्युच्यमानं यदि सर्वस्य कारणन्तदा ब्रह्मैव तेनाप्युच्यत इति प्रसाधनेन प्रसिद्धं ब्रह्मवेदान्तेष्वित्यासीत् यथाच दृष्टंचश्रुतश्चस्यात्तथापि संपादितं ब्रह्मप्रतीके, एतावताऽस्य सन्निधानमपि स्यादन्यस्य बाधकं, किमुतलिंगं लिंगान्तरस्य यद्यप्यस्पष्टमित्यप्यासीत् नहि तत्र प्रसिद्धे सन्निहितेऽन्यश्श्वसितुमपि शक्नोतीति अतः प्रतीकोपासोपरि स्वतन्त्रापि सास्योपदेष्टव्या शब्दान्तराहरणानन्तरं ब्रह्मणि साधारणोऽपि शब्दो विशेषणीयइत्येतदपि संप्रति सांप्रतमित्यादिक्रमभिप्रेत्योपक्रमते 'सर्वत्र प्रसिद्धोपदेशादिति' यातु सर्वत्र प्रसिद्धेनोपक्रान्ता, यस्याश्च यस्यस्यादद्धानविचिकित्सास्तीत्याह पूर्वोपासकः, सैवाद्यप्रथममवतारणीया शाण्डिल्यनामांकिता विद्याऽस्य विषयः प्रसिद्धश्चायमर्थस्सर्वत्र योयज्जलानस्सतदात्मकः, यथा मृज्जलानो घटादिर्मृदात्मकः हाटकजलानः कटकमुकुटादिर्हा-

टकात्मकः, जलजलानो वीचीतरंगादिर्जलात्मकइति प्रसिद्धश्च सर्वत्र वेदान्तेषु सर्वस्य ब्रह्मजलानस्यमत्र हेतुतयावलंबितन्तज्जलानिति, प्रसिद्धश्च तेन सर्वत्र ब्रह्मभावोऽत्र प्रसिद्धतयाश्रावितस्सर्वं खल्विदं ब्रह्मेति, एवं सर्वत्र प्रसिद्धस्यैवात्र मनोमयत्वादिनोपास्यत्वेनोपदे- शादिति भाष्याशयः, अत्र विकारप्राचुर्यसाधारणतद्धितान्तो विशे- ष्यते सर्वत्र प्रसिद्धस्य सन्निधानमवलंब्य नह्युपास्यसकलगुणवत्तयो पेते सन्निहितेचाचार्येऽन्तेवास्युपास्यो भवति कथंचित्तत्सदृशोपीऽति प्रभूतेह्यस्य सामान्य "न्तद्धितार्थोऽपि सामान्यन्नापेक्षायानिवर्तक' इति भामती, ईदृशोऽयं पादइत्यन्ते साधारणशब्दविशेषादिति नि- गमनेन सूचयिष्यति सूत्रकारोऽपि, अत्र प्रसिद्धस्य पराकरणाय शब्दान्तरं लिंगमपि स्पष्टमपेक्षितं पूर्वपक्षिणः, शब्दान्तरश्चात्राणी- स्त्वव्यपदेशस्तद्व्यपदेशादित्युक्तो वक्ष्यते चशब्दादिभ्यइति लिंग- मपि स्पष्टमन्तरवस्थानमर्भकौकस्त्वादित्युक्तं वक्ष्यते चान्तःप्रतिष्ठा- नाच्चेति, आभ्याञ्चा स्पष्टं ब्रह्मलिंगं, प्रसिद्धस्यापि सन्निधानम- न्यार्थत्वान्नप्रकृतं बाधितुमुत्सहतेऽन्तेऽपि ब्रह्मसंकीर्त्तनं सर्वं खल्विदं ब्रह्मेत्युक्तिमवलंब्यस्तौति प्रकृतमुपास्यंजीवमित्यभिमन्यतेऽत्र पूर्वपक्षी सिद्धान्तिनोऽपि पाश्चात्यं लिंगमस्पष्टमिति त्रितयमपेक्षितं यद्विवक्षि- तत्वं गुणानामनुपपन्नताचान्यत्र, स्मृतिश्चेति उक्तश्चात्रैतत्त्रितयं, व- क्ष्यते चानुपपन्नताऽसंभवादित्यन्तरालेऽप्यनुषञ्जनाय, स्मृतिश्च स्म- र्यमाणमिति वक्ष्यते यदि लभ्यतेऽनुषञ्जनीयान्तरालेपीत्येवमर्थं, वि- वक्षितत्वन्तु गुणानां सर्वत्राप्यनुवर्त्तनीयमित्येतत्सर्वमत्र विभावनीयं, सत्यप्येवमस्पष्टजीवादिलिंगकोयं पादइत्युक्तिः परेषामति रभसात्, नहि विधूनितमत्तमातंगम्महामारुतमभियुङ्क्ते समुदायोऽपि मशकानां, मन्देतु तस्मिन्नेकोऽपि शक्नोति तमभिगन्तुम्मशकइति । एवं सर्वं ख- ल्विदमिति वाक्यमेवोपासनविधायकं, मनोमयइत्यादिकन्तु गुणवि- धायकं, तथाचेह ब्रह्मशब्देन प्रत्यगात्मोच्यते परोवेति विशयः,

सर्वशब्दनिर्दिष्टंहि ब्रह्मादिस्तम्बान्तं जगत्, ब्रह्मादिभावश्चाविद्यावतः प्रत्यगात्मनएव विद्यते, नाविद्यादिदोषगन्धरहितस्य परस्य, ब्रह्मशब्दोऽपि प्रतीचि क्वचित्क्वचित् प्रयुज्यमानो दृश्यते अतएव कुहचित्परं ब्रह्मेति परस्मिन् सविशेषणोक्तिः, ज्यायस्त्वसत्यसंकल्पत्वादयस्त्वस्य वस्तुतो ब्रह्मभावेनोपपद्यन्तइति प्राप्ते आह सर्वत्रेति सर्वत्र सर्वमिति निर्दिष्टे सर्वस्मिन्जगति, ब्रह्मेति तादात्म्येन विधीयमानं परमेव कुतः, तज्जलानिति सर्वं खल्विदं ब्रह्मेतिच प्रसिद्धवदुपादेशात्, एवं वेदान्तेषु परस्यैव प्रसिद्धत्वादित्यर्थइति वर्णयन्ति, श्रुतिवाक्यविवरणन्तु छान्दोग्यविवरणभाष्यानुकारि, इदञ्चैतेषां स्वमतेन, इतःपूर्वत्वस्मदधिकरणं लिखितं, तत्रारुचिकारणमुपक्रमोपसंहारगतब्रह्मशब्दनैकविषयत्वप्रतीतिस्वारस्येनाभिन्नाविषयत्वप्रतीतिपूर्वकपूर्वपक्षानुदयइत्याह श्रीमान् सुदर्शनाचार्यः, अत्रोच्यते येनोपक्रान्तं ब्रह्मजिज्ञासेति तदत्र श्रूयते क्लीबान्तं ब्रह्मपदं, यदस्य जन्माद्यस्ययतइत्युपक्षिप्य व्यवस्थापितं कृत्स्नेन पादेन तदपि श्रूयते तज्जलानिति सर्वस्य ब्रह्मजलानत्वन्तदधीनञ्च ब्रह्मत्वं घटादेरिव मृत्वं, अस्तिचान्तेऽपि ब्रह्मपदं, तत्र कथमस्य जीवपरतेति। नचाविद्यादिदोषविहीनस्य ब्रह्मादिसर्वभावो नघटते जीवस्यतु घटतइति तदाशङ्कितवाच्यं, तथासति कुतोऽस्पष्टता जीवलिंगस्येति। अहह केयमत्र भवतामपि विस्मृतिः, अन्ययोगान्योगौहि पणायितावद्य तत्र यदि ब्रह्मणो ब्रह्मादिभावो नघटतइत्याक्षिप्यते कारणत्वमेव ह्याक्षिप्यतइति भवति, तथासत्ययोगएवहि पर्यवस्यतीति नच ब्रह्मणः कारणत्वाद्विलक्षणमिदमुच्यते जीवस्येतिवादइति वक्तुंशक्यं। तत्कारणत्वस्यैवान्यत्र योगस्यवक्तव्यत्वात् सत्यप्येवमस्मत्पूर्वपक्षानुत्थानोपन्यासः कुलटायाः कुलस्त्रियामिवापवादारोप एव भवताम्। सर्वं खल्विदं ब्रह्मेतइति वृत्तिविरोधस्त्विष्यत एव, यतोऽसंगतापि वृत्तिरनुरोद्धव्येति नास्तीशाङ्का। ततोयदि प्राथमिकं वाक्यं शमविधिपरतय-

ननीयते तदानास्त्यत्राधिकरणस्योत्थितिरिति विज्ञेयं, समर्थितश्चा-स्मत्पक्षे पूर्वःपक्षः । यदत्र- श्रवणादिना निष्पाद्याशान्तिरूपासन-स्य निष्पादिका तस्याश्च 'तस्मादेवं विच्छान्त उपासीतेति सिद्ध-त्वात् कुत्रापि शान्त्युपायत्वेनोपासनविधानाभावाच्छान्तपदस्य-तत्कामपरत्वास्वारस्याच्चत्यक्तं परकीयं विवरणमित्युक्तं सुदर्शनेन तत्तु तस्यात्यन्तमप्रतिमान्द्यमाविष्कृणोति । यतो यदभावात् संसर-ति सर्वोजन्तुस्सहस्रवारमपि सा विधातव्या, अत्रैव विधिरन्यत्रा-नुवादइति वक्तुं शाण्डिल्यविद्यांगत्वेन विशिष्यविधानमित्युपगन्तुञ्च-शक्यते च, स्नातः कुर्वीतेति न विधातव्यं, तथासति स्नानकामेन कर्मकर्तव्यमिति विहितं स्यादिति ब्रुवाणो मन्दप्रज्ञइति विस्पष्टमेव विज्ञातुं शक्यमिति, यदप्यस्मदीयाधिकरणानुवादे सर्वत्र ब्रह्मधर्म-त्वेन प्रसिद्धस्य मनोमयत्वादेरत्रोपदेशादिति हेतुपरिष्करणम्मूल-कारस्य तदपि तथाप्रसिद्धत्वे श्रुते च पूर्वं ब्रह्मपदे पूर्वपक्षविभञ्ज-कतयाऽसमञ्जसं, अस्मत्पक्षे पक्षपदालाभदूषणस्य तु तृतीयएव यो-गः प्रतिवक्तेति, अथास्त्यत्र "विवक्षितगुणोपपत्तेश्च" ति सूत्रं प्रा-येण स्वतन्त्रसगुणोपासनवाक्यविषयोऽयं पादः नतु पूर्वइवानुपपन्न-गुणकप्रतीकोपासनतद्विषयः, नवापरइवाविवक्षितगुणकविषयकश्चेति संसूचकं, अस्तु केऽत्र विवक्षिता गुणाः ननु सर्वेऽपि, कथन्तर्हि विशेषणं ननूक्तं प्रयोजनं न प्रकृतप्रयोजनार्थेनैवार्थान्तरसूचनस्य न्याय्यत्वात् अस्तु तर्हि श्रीभाष्यकारोक्तं प्रयोजनंविवक्षितस्यैव वक्ष्यमाणत्वाद्वक्ष्यमाणगुणेत्येवमर्थं विवक्षितेति विशेषणमितिचेन्न । तस्यापि प्रयोजनस्य वक्तव्यत्वात् अस्ति प्रथममेव वाक्यमुपासन-विधायकमिति सूचनं प्रयोजनमितिचेन्न, तस्य निराकृतत्वात्, वक्ष्य माणेति विस्पष्टमनभिधानकारणस्य वक्तव्यत्वाच्च, के तर्हि विवक्षि-ताः, ये पुनः पुनरप्युपादानेनाभ्यस्याद्दतास्सर्वकर्मत्वादयस्तेऽत्र वि-वक्षितास्युरिति वक्तव्यं, अथ न मनोमयत्वादयो विवक्षिताः, चेत्

किं, कथमेवन्तर्हि विशेषणं, न, परीक्षावसरत्वात्, पूर्वापरपरीक्षाहि क्रियतइदानीं. उपासनाप्रकारस्तूपास्यनिर्धारणानन्तरनिर्धारणार्हः, तथाचात्र मनोमयत्वं प्राणशरीरत्वं "बुद्धिविज्ञानमयत्वेन भारूपत्व-मणीयस्त्वमित्यादयः प्रसिद्धिबलेनोपकरणोपकरणिभावनिबन्धना स्पष्टाएव जीवीयत्वेन सन्ति गुणाः केचन प्रथमं श्रुताः, चरमश्रुतत्वेन तैरभिभूता वस्तुतो ब्रह्मभावमादाय जीवेऽपि नेतुं शक्याइत्यस्पष्टा स्सन्ति सत्यसंकल्पत्वादयश्च केचन गुणाः, तत्र पूर्वपक्षे मनोमयत्वा दयो भवन्त्यविवक्षितास्सिद्धत्वादुपासकस्य सत्यसंकल्पत्वादयस्तू-पक्रमोक्तयथाक्रतुन्यायेन संपादनीयाइति भवन्ति विवक्षिताः, ते च परस्मिन्नेवोपपद्यन्ते, सन्निहितश्चसः न हि सन्निहितउपपन्नेऽनुपप-न्नग्रहणं युक्तं, न च सर्वं खल्विदं ब्रह्मेत्युक्तब्रह्मभावापेक्षयास्मिन्न-पि समञ्जसास्तइति वाच्यं, अतिवृत्तत्वात्तदपेक्षायाम्मनोमयत्वादेश्श-रीरत्वस्य, मनोमयत्वाद्यवच्छिन्नेतु शारीरे ब्रह्मधर्मानाञ्जस्येनोपप-द्यन्ते, आञ्जस्यस्यैवाभावे कुतस्सामञ्जस्यं, तथाच भाष्यमिति चैव ञ्जातीयकागुणा न शारीरआञ्जस्येनोपपद्यन्तइति, सूत्रश्चानुपपत्तेस्तु अनुपपत्तेरेव न शारीरइतीति । अत्र यथासत्यसङ्कल्पत्वादयो ब्रह्म ण्युपपद्यन्तएवं शारीरेऽप्युपपत्स्यन्ते शारीरस्य ब्रह्मणोऽभेदात् शा-रीरगुणा इव ब्रह्मणीत्यतआह सूत्रकारो नेतरइतीति भामती, तत्र सूत्रकारग्रहणन्तस्याभेदवादित्वएवेदं सूत्रं सार्थकमन्यथा निरर्थक-मेवेति सूचयितुं, तदिदमसहमानश्चोदयति सुदर्शनः, यथा सर्पादि-व्यावृत्तरज्जुत्वादिप्रतीतौ भीषणत्वादिना रज्जोर्विशेषणन्नोपपद्यत-एवं जीवव्यावृत्तसत्यसंकल्पत्वादिप्रतीतावध्यस्तजीवधर्मेण मनोमय त्वादिना परस्यापि विशेषणन्नोपपद्यते नित्यस्य जीवस्य कथमारो-पितत्वञ्चेति बलाबलविचारोयज्जीवत्वमेव शारीरत्वापरपर्यायमारो-पितमुपासनाप्रकारस्तु छान्दोग्यविवरणादेवाऽधिगन्तव्यइत्यादिक-मजानानः, अधिष्ठानन्तु सर्वास्पदं स्यान्नत्वारोपोऽधिष्ठानधर्मास्पद-

मित्येतदप्यजानानः । छान्दोग्यविवरणभाष्यन्तु वाक्यभेदापादकमधिकरणमुल्लंघ्य, अधिकरणन्तु कृत्वा चिन्तया, तत्फलन्तु परार्थे सन्निहितमपि ब्रह्मैवानुवर्तनीयमुपासनाय प्रसिद्धत्वात्सर्वत्र नहि प्रसिद्धे सन्निहितेऽन्यमुपास्ते मन्दोऽपीति प्रसिद्ध्यतिशयप्रसाधनायैवेति

तदेवं—पादस्सर्वो यदीयो दिविदिवइतियद्रूपमाहस्म पश्चा-
ज्ज्योतिस्सर्वं खल्वक्तं शमगुणविधये यज्जलानज्जलानं ।
सर्वत्रैव प्रसिद्धं श्रुतिशिखरगुणेष्वत्र शाण्डिल्ययोगी
यं संप्राप्तस्स मे स्याद्धरिरिह शरणं सत्यसंकल्पकामः ॥

इति सर्वत्र प्रसिद्धाधिकरणं ।

---

अथ यद्युक्तं विश्वं क्रमप्राप्तन्तं व्युत्पादयति—

## अत्ताचराचरग्रहणात्, प्रकरणाच्चेति ।

अत्रावयवत्त्वत्तैनकदेशविवर्तिनाव्यस्तेन रूपकेणरूपीकृतोऽत्तेति कश्चित् प्रथमं बुद्धिमधिरोहति, यस्येत्यस्योदन इत्यादौ ससंबंधिकएवान्वयात्, तेन स्वारसिकेनात्तृत्वेन जीवलिंगेनाभिभूयमानं ब्रह्मलिंगमस्तिवा नवेत्यन्वेषणीयमितीवाहात्र सूत्रकारोऽत्तेति पक्षं संपादयन्, इदमेवानुभाषते भाष्यकारोऽत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयत इति । अन्विष्यगृहीतमिव प्रयुङ्क्ते 'चराचरग्रहणादि' ति सूत्रकृत्, विषय्युपरक्तविषयानुसंधानात् परंप्रतीतमर्थमादाय प्रयुङ्क्त इत्यनुभाषते मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वादि 'ति भाष्यकृत् । अथ कथमदनीयस्य गळाधोभागसंयोगानुकूलव्यापारस्यात्तृत्वस्य परापरसाधारण्यमितिचेत्, मनोमयत्वस्यवा तत्कथं । मास्तु तस्यापि तदिति चेत् । तर्हि 'तद्धितार्थोऽपि सामान्यन्नापेक्षायानिवर्तक' इति कथं भामती, अस्तु भामत्यप्यसंगतेति चेन्न । तज्जलानिति जन्मादि हेतुत्वं परस्य श्रुत्यन्तरप्रसिद्धमादाय प्रवृत्ता हि श्रुतिमुपसूचयन्तुदाजहार प्र-

सिद्धिमेव हेतुतया तत्र सूत्रकारः, तेनान्यत्र यथा प्रसिद्धपदब्रह्म-तथात्रप्रसिद्धं ब्रह्मवेदान्त इत्युक्तं भवति, तथाचसमानं विकारप्राधु-र्ययोस्तद्धितार्थत्वन्नापेक्षायानिवर्त्तकमिति संशयोपपत्तिः, अथ बली-यसीलौकिकी प्रसिद्धिरिति विकारएव प्रथमं बुद्धिमधिरोहतीत्या-क्षेपे, सर्वत्रप्रसिद्धस्यात्रोपदेशादिति सन्निधापयामास सन्निहितं ब्रह्म, यथा ज्योतिरधिकरणे, एवं वेदान्तवाक्यप्रतीतपरत्वमपि परापरसाधारणं पुरोवस्थितस्यात्मसात्करणमेव न तु पूर्वोक्तम् । अत्रापि सन्निधापयति प्रकरणाच्चेति ब्रह्मेति । शास्त्रप्रसिद्ध्यापि पूर्वपक्षलाभायाग्निर्वाऽत्तेति । एवं स्थितेऽत्रजीवः परोवेति शिरोद्वय मेव, नतत्रयम्, चित्याग्नेरेव पूर्वं प्रस्तुतत्वेन साक्षादग्न्यप्रस्तावात्, विच्छिन्नत्वाच्च तत्प्रकरणस्य, अध्यात्मप्रकरणे विद्याङ्गकर्मोपयोगि-त्वमन्तरेणाग्नेरनुपयोगेन तद्वैभवप्रतिपादनायोगाच्चेति वदन्ति परे । उपकोसलविद्यायामग्निभिरेवेयमस्मद्विद्येति स्वोपासनोपदेशादप्रकृत मपि जीवमिव पूर्वाधिकरणेऽत्राग्निमादाय पूर्वपक्षकरणेऽपि प्रकरणेन प्रतिक्षेपसंभवात् ब्रह्मजज्ञं देवमीड्यं विदित्वेति गृहीकृत्य विराड्रूप-स्याग्नेरुपासनस्य प्रस्तुतत्वात् प्रकरणविच्छेदस्य जीवेनसमानत्वाद-न्यथा प्रकरणाच्चेत्यस्याऽयोगादुक्तयुक्तेश्च नाग्निपरित्यागो न्याय्य-एषां किन्तुभूतग्रहोपि न्याय्य इति । अथात्र कल्पतरौ यत्र शुद्धे स चराचरसंहर्त्ता तत्कइत्थमिति वेदेति शुद्धस्य दुरवबोधत्वशेषतया पूर्वभागस्य नयनेन किमर्थन्तस्य ब्रह्मपरत्वव्यवस्थापनव्यसनम-स्माकं, जीवपरत्वेऽपीष्टसिद्धेरितिचेन्न । अनुग्रहार्थत्वात् । येम-न्दास्तेऽनुकंप्यन्तेहि सविशेषनिरूपणैः । तदत्रास्तु जीवपरत्वमेव का नो हानिरित्यौदासीन्ये कथमीश्वरसिद्धिः । तदभावे कुताद्वैतैकत्वं, तदभावेतु कुत्रकथमहंग्रहः, तदभावेच कुतस्तेषामद्वैतैकत्वविज्ञाना-न्मोक्षसिद्धिरिति विधत्ते भगवती श्रुतिरुपास्य ब्रह्मसाधनपूर्वकन्तत्रा-हंग्रहोपासनम् । ततस्तन्निर्धारणाय प्रवृत्तेऽत्रसूत्रकार इति । अथ

परस्मिन्नेव समन्वयइति साधयितुं प्रवृत्तस्य कथं विशिष्टस्यावान्तर-तात्पर्यविषयस्यात्रसाधनं संगच्छेतेति चेन्न । जन्मादिनाह्युपलिलक्षयिषितं ब्रह्म । तत्र यज्जन्मादि हेतुत्वविशिष्टन्तत्सिद्ध्यधीनसिद्धिकन्तदुपलक्षितमित्यावश्यकत्वाद्विशिष्टसाधनस्येति । यदात्वासीनो दूरं व्रजतीत्यादिनोक्तोविरुद्धधर्म समावेशात्मकस्स्वरूपोपहितरूपाभ्यां समाधेयतया दुरवबोधश्चराचरसंहर्तुरेव प्रकारोयत्रेत्यनेनोच्यतेऽस्मिन्नेवसर्वेश्चराचरमात्मसात्कृत्यबीजभावमात्रसंपन्ने सुप्रदर्शे शुद्धं ब्रह्मतीति विभाव्यते तदानकोऽपिक्लेशइति विभावनीयम् । येयं प्रेत इत्यत्र प्रेते मोक्ष्यमाणेसतीत्यर्थमुपयन्ति परे तत्र कथमास्तिकसार्वभौमस्य यमसमक्षमेव मृतजीवविषयकसत्वासत्वशंकायुक्तेति युक्तिश्चाचक्षते, तत्रकथमेवमेते संशेरतइति संशेमहे । नहि चार्वाकेणवाऽशंकनीयमास्तिकेन माध्यमिकेनवैवाशंकनीयमिति कोवाशंकेतास्तिकः, ब्रह्मव्यतिरेकेणास्ति नास्तीति विप्रतिपत्तिरिति व्याख्यातारस्तुनप्रतिवचनार्हाः । यतो निरंकुशाः । यतोनायमस्तीति चैके वेदान्ताइत्येवं व्याख्यातव्यन्तैः, शास्त्रमन्तरेणानवगम्यमानत्वात् ब्रह्मात्मभावस्य, तत्र यदिशास्त्रीयपक्षान्तरतयाऽयमुपेयते तदात्रैवाऽपूर्वेपर्यवसानस्यवक्तव्यतया स्वपक्षप्रतिक्षेपायैव यतन्तेत इति पर्यवस्यति, अहह भाष्यादि प्रणेतारोऽप्यार्थवादिक कथास्वपि बद्धादरामोमुह्यन्ति मुग्धाइवेति किमिदं संवृत्तं । किञ्च, न हि कुण्डेबदरमिव शरीरे पृथगात्मानं पश्यन्नेवास्तिकः कर्मसाकल्यवैकल्यनिमित्त फलाफलप्राप्तिमाशंकमान आशंकते, किन्तु शास्त्रप्रामाण्यनिश्चयेन परोक्षमेव निश्चिन्वन्, यतआस्तिकपरिबृढानामपि शरीरपूजापरिभवादौ हर्षविषादौ दृश्येते । अत एवाहस्म भगवान् भाष्यकारस्तेषामपि पश्वादिभिश्चाविशेषम् । नहि यमसदनेऽपि यमादयोवा नारकिणोवाऽशरीराएव जीवरूपास्तेन दृष्टा इतिवा द्रष्टुमर्हाइतिवा कल्पयितुं शक्यम् । यमादिभिस्संवादादिश्रवणात् । नच वैतरणी

नद्यादिकल्पसिपत्रवनादिकश्चातीत्यग्रामान्तरमिव मनुष्यमात्रेणाञ्ज-सैव प्राप्तं यम सदनमित्यपि कल्पयितुं शक्यम् । किन्त्वत्यन्तमा-स्तिकस्यासत्यादतिभीतस्य कुमारस्यापि सतः पितृवचनं सत्याप-यित्वा तद्धितमेवाभिलषतो यथाश्रवणं यममेवाभिध्यायतोगच्छतश्च-तस्यैवदेवस्य प्रसादेन स्वप्नइव सर्वमपि निर्यातयमयमालयप्राप्त्या-पंजातमिति कल्पयितव्यम् । तत्र दृष्टेचदेवेयदिदं कर्मोपास-नाकाण्डजीवनभूतमिदंकाम इदंकामइति श्रुतमपि बहुशोनिश्चितमपि सुदृढं वादिभिर्विकल्पनात् स्वभावतश्च भूयोभूयस्संदिह्यमानं शरी-रादतिरिक्तं कर्तृरूपं कर्मोपासनेच ब्रह्मलोकान्तसन्दायके तत्वम-स्यहंब्रह्मास्मीतिच वेदान्तप्रमाणराजप्रतिबोधितमपि कथमेवंस्या-दिति सन्दिह्यमानमन्तरेण शंकरं ब्रह्मादिभिरप्यन्यैर्धर्माधर्मकृताकृ-ताद्यतीतन्निर्भेदं ब्रह्मचास्मादेवदेवान्मृत्योस्सर्वज्ञादवगन्तव्य मिति मन्वानोऽधीतसाङ्गसशिरस्कस्वाध्यायोयं पप्रच्छैवन्नचिकेताइत्यत्र कानुपपत्तिरिति । अथभाष्ये प्रकरणाच्चेति सूत्रे, नजायते म्रियते वेति मंत्रः कथमुदाह्रियताम् । परस्य जननाद्यप्रसक्त्याऽस्य जीव-विषयत्वात् । भीष्मादि बंधुवियोगात् भीतं समाधातुं भगवतास्याव-तारितत्वाच्च । अतोमहान्तं विभुमात्मानं, नायमात्माप्रवचनेन लभ्य इत्यादिकमुदाहरणीयमिति चेत् न, श्रुति सूत्रभाष्यार्थप्रकाराणाना-मनवबोधात्तथोदाहरताम् । तथाहि सर्वसंहर्तृत्वेन परएवात्तेतिनिर्धा-रिते, संहर्तुरपि संहर्तुर्दृष्टत्वात् कथं सर्वसंहर्तृत्वं, कथंवा परत्वं ब्रह्म-क्षत्रादिसर्वाघातुकस्येत्युभयाशङ्कावारकं हि प्रकरणमुदाहरणीयं, न तु यत्किञ्चित् , तत्र नजायते म्रियतेवा कदाचिदिति चराचरेषु लो-कदृष्टिदृष्टेजननमरणे निवारिते, नायंकुतश्चिदिति स्वरूपतोजनिर्निवा-रिता, ततोनास्त्यस्याप्यत्तेति सिध्यति । ततोहंतृत्वदोषापनयाय, नबभूवकश्चिदप्यस्मात् , तत्र कं हन्यात् , यतस्स्वात्मानमेवानेकधा

प्रसारयित्वा पुनस्स्वात्मन्येवोपसमाजहार, ततः कुतोदोषः कुतश्चन परइति प्रतिपादितम् ।

अतएव नायं हन्ति न हन्यतइत्युभयनिषेधः, एकत्ववचनाच्च, जीवपरत्वे कथमेकत्वमुपपद्येत विपश्चित्वलिंगाच्च, ब्रह्मणा विपश्चितेति ब्रह्मणोहि विपश्चित्वं श्रुतं श्रुत्यन्तरे भगवतापि 'नत्वेवाहंजातुनासन्नत्वन्नेमे जनाधिपाः। नचैव नभविष्यामस्सर्वेवयमतःपरमिति' कर्मोपासनोपयुक्तजननमरणास्पृष्टजीवबहुत्वमुपपाद्य किमेतेन बहुप्रलापेन, एकएवायमात्मा त्वयि मयि सर्वत्रच परमेश्वरः, तस्य कुतोमरणं तस्य कुतोवा जनिः, तथाहि श्रुतिरितीदमवतारितं यदि, कुतो भगवद्वचनविरोधश्च, परेणाप्यहमेकः प्रथमासं वर्त्तामिच भविष्यामि चेत्युक्तं, तदुदाहृतन्तु नक्वाप्युपयुज्यतइति भाष्योदाहृतमेव प्रकरणानुगुणमिति ।

नायंहन्ति नहन्यतेच भुवियं हन्ताहतश्चेत्युभौ
जानीतोनशयानइत्यपि यतोयात्येव सर्वत्रयः ।
कस्तंवेदमदामदं रविसुतं ब्रह्मात्मनिष्ठं विना
लब्धासोऽपि यमेवचैषवृणुते तंदेवदेवं भजे ॥
चराचरमिदञ्जगत् सकलमेवयस्योदनं
कृतान्त उपसेचनं कृतपुरत्रयप्लोषणम् ।
अदर्शनभियापुनर्हरिदृगश्चितांघ्रिं हर-
न्त्रिलोचनमहं भजे विधिशिरः कपालाचितम् ॥

इत्यत्राधिकरणम् ।

---

अथ यदन्नं विश्वन्तदतः पृथक्प्रतिपादनीयमित्याह—

**गुहां प्रविष्टावात्मानौहि तद्दर्शनात् । विशेषणाच्चेति ।**

अत्रौप्रत्ययस्साधारणः, छायातपाविति शब्दान्तरं, गुहाप्रवेशएवलिङ्गम् । जनिस्तु जनकैकपूर्वा, संहारस्तुसंहर्त्रैकावसानः,

पाकनन्तु पाल्यपालकोभयाविनाभूतमिति श्रुतिसूत्रयोरनेकद्विवचना न्तोक्तिः, अवितुरवनोपपादनायैवावनीयेन सहोक्तिः, नतु तस्याप्युपपादनाय, अतोऽवितैवास्य विषयइत्यवधारयितव्यं, ऋतं पिबन्तावित्युत्तरवाक्ये यतोबुद्धिर्द्वितीयो जीवएव प्रतिपाद्यते ततइदमपि तत्परमेवेत्याक्षेपे आह गुहामिति यतो गुहां प्रविष्टा वात्मानौ, ततो ब्रह्मैव प्रकरणि, तयोरेव, गुहाहितं, अदितिर्देवता मयी गुहां प्रविश्य तिष्ठन्तीमितिच गुहाप्रवेशदर्शनादितपूर्वेणदमेकाधिकरणयन्ति परे, तत्र पक्षोहेतुः, तत्साधकश्चेति त्रयमपि ग्रथयित्वा हेत्वन्तरस्य ग्रथनेऽपीदं यदि न स्वतन्त्रन्तदा किंवा तथा स्यादिति विमृशन्तु विमर्शकाः अत्तेवाविताऽपि पाययिता पृथगेव प्रतिपाद्यइत्यस्यानुत्तरत्वाच्च । तदेवं--

यस्य छायेव जीवो यइह हृदि गुहान्तेन साकं प्रविष्टो
यःपातारं स्वकर्माशयफलममृतं पाययत्यन्तरात्मा ।
एवं पञ्चाग्नयो ये यइह हुतवहाश्चिन्वते नाचिकेतं
विद्युर्विश्वानिषण्णास्सतु हृदि सततं सन्निधत्तां हरिर्मे ।।

इति गुहाधिकरणं ।

---

अथेदानीं यदन्योऽन्तर आत्मान्योऽन्तर आत्मेत्यानन्दमयस्याप्यन्तरतया "यदेषआकाश आनन्दोनस्यादित्यवतारितमिदमेवशास्त्रार्थ इति षड्विधमपि तात्पर्यलिंगमुपन्यस्य निर्धारितमानन्दमयाधिकरणे पुच्छं ब्रह्म, तदेवसुखविशिष्टतया संयद्वामंसर्वेषामपि वामानां भामानाञ्चोपनायकमक्षिण्येव दृश्यमानमुपास्यं कं खं विशिष्टगतिप्राप्यञ्चविचार्यनिश्चेतव्यमित्याह—

## अंतरउपपत्तेरिति ।

अत्र विशिष्टाभिधानेति साक्षादेवपादार्थाभिधानम् । गत्यभिधानाभिधानमपि विशिष्टविषयत्वोत्तंभनं । अस्तु कात्रोपपत्तिः ।

प्रथमेनावह्रात्मत्वामृतत्वादीनां तत्रतत्र ब्रह्मणि श्रुतानामत्रापि श्रवणस्यव्याप्तिमत्वात् ब्रह्मण्युपपत्तिः । ततश्चानुरूपस्थानकल्पनोपपत्तिः यथामहार्हमासनमिदं कल्पितमित्युक्ते महाराजार्हमेवेत्युपपद्यते तथा निर्लिप्तमिदं स्थानं कल्पितमित्युक्ते निर्लेपार्हमेवेत्युपपद्यत इति । अन्यथास्थानेनापि दूषणेनस्थानस्यापि दूषितत्वापत्तेरिति । नन्वेवं सत्यार्थत्वादिकल्पनानुरूप्येणापि पर एवेति प्रतीयतइत्यर्थः पर्यवस्यति । तत्र कथं काचादिभिरलेपत्वान्नपरस्थानार्हश्चक्षुरित्यपि वक्तुं शक्यमिति दूषयति भाष्यं सुदर्शनः । न "ह्ययंहि धूर्जटिस्साक्षाद्येनदग्धाः पुरःक्षणा"दित्युक्ते स्वपुरपरिपालनादधूर्जटिरित्यपि वक्तुं शक्यमिति कश्चित् पर्यनुयुङ्क्तइतिचेदेवमदर्शनात् स्यात्पर्यनुयोगः । तृतीयातुसंयद्वामत्ववामनीत्वभामनीत्वानां घटनोपपत्तिः ।

## ॥ स्थानादिव्यपदेशाच्च ॥

अत्र कस्थानशब्दार्थः । आदिपदार्थोवा । किंवास्यसाध्यमिति । अत्रतावदाह । अनवस्थितेश्चेति व्यतिरेकेवक्ष्यमाणत्वात्तत्प्रतियोगिनीस्थितिरिहान्वयेस्थानशब्दार्थो 'यश्चक्षुषि तिष्ठन्निति श्रूयमाणा नाधारः । तत्प्रयुक्तदोषस्यार्भकौकस्त्वादित्याशंक्य परिहृतत्वात् । परस्यैवेदं व्यपदिष्टमन्तर्यामिब्राह्मणेऽत्र प्रत्यभिज्ञायते । नच तत्राप्यपरस्यैवेदमस्तुव्यपदिष्टमिति वाच्यम् । यतस्तत्र चक्षुरन्तरोयमयतीति नियमनेन सहव्यपदिष्टमतः परएवायमिति परत्वं साधयति, नियमनाद्यादिपदार्थइति । अपरः प्रत्याह । स्थानमित्युक्ते प्रथममाधारएव बुद्धिमधिरोहति, यथावस्थानमित्युक्तेऽवस्थितिः । अनवस्थितेरितिस्थित्यानियमोहि हेतूकरिष्यते । तत्र तत्प्रतियोगिप्रापकं स्थानपदमित्युक्तीरभसात् । चक्षुषितिष्ठन्नित्यत्राधारस्यैव प्रथमतश्श्रवणाच्छ्रुत्यन्तरमापिनानूकूलम् । नियमनमप्युत्तराधिकरणसाध्यमिति नतद्बलादपीष्टसिद्धिः । नच सिद्धवद्धेतूकरणमिति वाच्यम् । तदपेक्षया साधितस्य हेतुत्वसंभवे तस्यैवयुक्ततर-

स्त्वात् । स्थितिव्यपदेशस्य सिद्धान्तसाधकत्वेऽन्तःप्रतिष्ठानाच्चेत्युत्तरत्र पुनरप्याशङ्कायोगात्, अतः पूर्वपक्षप्रथमबीजस्यापरपक्षेऽपि पुनःपुनरबाधकत्वमेवोच्यते । तत्रयथानामरूपादिकमप्युपास्यत्वायोपदिश्यत इत्यवादिष्मतथेदं स्थानमपि व्यपदिश्यत इति गृहीतव्यमिति नामादिकमेवादिपदार्थः । ननु नियमनादिकमिति स्वभाष्यादरोपाधिनैव सुदर्शनोप्यदर्शनोजात इति । ननु सुखविशिष्टाभिधानादेवचेत्युक्त्यैव कं खं ब्रह्मब्रह्मैवेति साधितेऽपि, कथं सुखाकाशपरयोः कं खं पदयोर्ब्रह्मपरत्वमित्याशंक्य अतएवच स ब्रह्म सुखविशिष्टाभिधानादेवच सुखशब्दो ब्रह्मपर इति किमनतिरिक्तार्थसूत्रान्तरकरणेन परेषामिति चेत् भाष्यकारपदवीमिव सूत्रकारपदवीमप्यारोढुमिति गृहाण-- तदेवं--

कं खं ब्रह्मपरं यदक्षिण पुरुषं पश्यन्ति यं योगिनो
यद्ध्यायीलभतेऽर्चिरादिगतिमान् ब्राह्मं दुरापं पदम् ।
संयद्वामइतीरितोऽथ भगवान् योवामनीभामनी-
र्देवश्चक्रधरं भजामि सततं तं कोसलाराधितम् ।

इति इत्यन्तराधिकरणं ।

---

## अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ।

अत्राधिदैवमन्तरादित्येऽध्यात्ममन्तरक्षिणिचाखिललोककामेशतया व्यवस्थापितस्यैवांतर्यमनादिनोपासनविधायकं वाक्यं विषयीकृत्यविचार्यते । अथकथमस्मिन्नस्यावकाशः । यतस्तद्धर्मेति धर्मस्यस्पष्टता प्रकीर्त्यत इति चेन्न । अत्र व्यपदिष्टस्यान्तर्नियमनस्य तस्मिन्नेवोपपत्तेरिति सिद्धवद्व्यपदेशात् । तथाचभाष्यम् । “परमात्मनोयमयितृत्वन्धर्मउपपद्यत” इति । अत्रेदमादौ विवेचनीयं । नियमनंतु द्विविधं बाह्यमाभ्यन्तरश्चेति, बाह्यन्तु भृत्यादीन्प्रतिराज्ञोवास्यादीन्प्रतितक्ष्णश्च, नेदमस्य विषयः, अन्तरोयमयतीति श्रुतेः,

आन्तरमपिद्विविधं प्रातिस्विकमनुगतञ्चेति, आद्यन्तु स्वस्वकार्य-
करणनियामकानाञ्जीवानां, द्वितीयन्तु सापेक्षं सहजञ्चेति द्विविधम् ।
सापेक्षमप्याधिकारिकं योगजञ्चेति द्विविधम् । तत्राधिकारिकं पृथि
व्यादीनाम् " सैषा पुरुषस्यापानमवष्टभ्येत्यादिना श्रूयमाणं ।
योगजन्तु यथा तंकणस्य महर्षेरीश्वरेतरसर्वप्रपञ्चनाटयितृत्वं, यथा
वा शुकस्य तर्वादिशब्दापयितृत्वं पौराणं, स्वाभाविकमपि गौणम्मु-
ख्यञ्चेति द्विविधं । तत्र गौणंस्मार्तं सांख्यानाम् । मुख्यन्तु पारमे
श्वरमौपनिषदानामनेन सिषाधयिषितमित्येवं पञ्चविधमान्तरन्नियम-
मनमिति । तत्र तद्धर्मेति ब्राह्मं स्मार्तं शारीरञ्च शब्दतएवस्फुटमुपात्तं
अधिदैवादिष्विति सप्तम्याऽव्यतिरेकसूचिकयाऽव्यपोह्यतयाऽधिकारि-
कमवबुबोधयिषितं । परिशेषात्तदित्यनेन व्यावर्त्यन्तां कणादिक-
मेवेत्यविस्रब्धमभ्युपगन्तव्यम् । तत्रलाघवात्सर्वानुगतमेकमेवग्राह्य-
मिति बहुवचनेनसूचिता काचिद्युक्तिः । तच्चनयोगिनि संभवति,
योगसिद्धेः पूर्वमभावादिति सूत्राशयः । तमिमं सूत्राशयं " योगि-
नोवा कस्यचित् सिद्धस्य सर्वानुप्रवेशेनयमयितृत्वं स्यादिति सर्वा-
न्तिमतयोपन्यस्य प्राचीकटद्भाष्यकारः । तत्परावर्त्तनमपि भाष्य-
भामत्योस्स्पष्टं । इदंतु सूत्रेऽन्तर्याम्यधिदैवाधिलोकादिष्वित्यधिकृतया
पठंतिपरे । माध्यन्दिनानां यस्सर्वेषु लोकेष्वित्यधिकं दृश्यते । तच्च
काण्वैरपि ग्राह्यं । तथाच विध्यैक्यमित्यभिप्राय इति प्रयोजनञ्चाचक्षते
सिद्धवत्कर्तुमिवात्मीयं पाठभेदम् । अत्रोच्यते । गुणोपसंहारपाद-
कृत्यस्य कात्र प्रसक्तिः ? उभयसाधारण्येनाधिदैवादिष्वित्येव वक्त-
व्येगुणोपसंहारन्यायेन विध्यैक्यमिति मतिर्माभूदित्येवमर्थमधिकपाठं
पपाठेति मतिभेदापत्तेश्चनायं पाठस्साधीयानिति । एवन्तर्ह्युभयेऽपि
हीत्युभयग्रहणस्य किं कृत्यमिति चेन्न । केचित्तु य आत्मनीति न
पठन्ति, तेषांज्जीवएवान्तर्यामीति न गतिसामान्यमिति शंकायान्तेऽ
पि विज्ञानशब्देन जीवं भेदेनाधीयत इत्येवमर्थमिति गृहाण । स्वपक्षे

तु विधेयस्य सूचितत्वादेकश्रोत्रएवन्यायोऽपरत्रापीति यच्चक्रेता-
यितमुभयग्रहणवैयर्थ्यमिति । अथकथमर्थान्तरं चेत्यप्रसिद्धपक्षान्तर
कल्पनं कल्प्येतेति चेत् अहह प्रसिद्धिपराधीने पादे सर्वत्राप्यप्रसिद्धि-
रेव प्रतिद्वंद्वीकर्तव्या । तत्र नियन्तृत्वेज्ञातएवतान्नियमयति लोकेरा-
जादिः, अयन्त्वतादृशोऽप्रसिद्धः कश्चिदित्येकत्रापि तत्प्रतिद्वंद्वेश्लाघ-
नीयेऽपि कथमेवं विषीदसि निद्रूपमात्रेणेति । यत्तु देवतायाएव
योगसंभवेन ततः पृथग्विफलं योगिकल्पनमिति तस्य तेनैवएव
सिद्धः प्रतिवक्ता । शारीरस्यैव देवतात्वसंभवेन ततः पृथग्विफलं
देवताकल्पनमित्यस्यापितुल्यत्वाच्च । यच्च सति द्रष्टृत्वादिश्रवणे कुत
स्स्मार्तशंका, नह्यर्थांशमादाय शंकेति घटते, जडस्य नियमनमप्य-
शक्यशंकम् । न हि मृदादिकं घटादिकन्नियमयतीति शंकेतकश्चित्,
सूत्रेतु सिद्धेनसाध्यस्य व्यपदेशः, तथाचशारीरश्चेत्यन्तमेकं सूत्रं,
यथाद्रष्टृत्वाद्यतद्धर्माभिलापान्नस्मार्तमन्तर्याम्येवं शारीरोपीति तदर्थ
इति । तच्च प्रत्युच्यते । सत्यपि यआत्मनितिष्ठन्निति श्रवणे कथं
शारीरशंका । नह्यर्थांशमादाय शंकेति घटते, स्वान्तर्नियमनमप्यश-
क्यशंक्यम् । नहि देवदत्तस्स्वात्मन्यन्तः प्रविश्यस्वन्नियमयतीति
शंकेत कश्चित् । सूत्रन्त्वधीयत इत्यन्तमेकमेव, यथाभेदेनाध्ययना
ज्जीवोनान्तर्याम्येवं स्मार्तमपीति तदर्थ इति । अथ जीवइत्यनुक्त्वा
शारीरइति पूर्वपक्षोत्तंभनात् कथमेवंस्यादितिचेत् । अथानुमानमि-
त्यनुक्त्वा स्मार्तमिति पूर्वपक्षोत्तंभनात्कथमेवं स्यात्, अथमृदादि-
ष्वदर्शनात् कथं शङ्कोदयः अथास्मदादिष्वदर्शनात् कथं शङ्कोदयः ।
विलक्षणस्य हिरण्यगर्भस्य स्यात् । विलक्षणस्य प्रधानस्यस्यात् ।
तस्मात् पञ्चशिराएवात्रविकल्पः, नतु देवताजीवपरैस्त्रिशिराः अथवा
षण्मुखः । तदेवं-

देवोनांतर्यमयति तथानाप्रसिद्धश्चकश्चि-
न्नैवस्मार्तं कइहतनुमांस्तं कणादिर्नयोगी ।

किन्त्वन्योसौ हरिरिति परस्तस्यधर्माभिलापा-
दन्तर्यामीसतु हृदि सदा सन्निधत्तांपमान्या ॥
इति इत्यन्तर्याम्यधिकरणं ।

---

अथाकाशाद्यधिकरणावधारितं भूतयोनित्वोपहितमपि विशि-
ष्टश्च शुद्धश्चेति द्योतयितुं भूतयोन्यक्षरवाक्यमवतारयति ।

## ॥ अदृश्यत्वादिगुणकोधर्मोक्तेरिति ॥

पक्षस्साधारणः, दृष्टान्तशब्दश्शब्दान्तरम् । अतद्धर्मानभिलापात्सङ्गतिः । अर्थवशादेवबहुव्रीहिग्रहणसंभवे प्रत्ययस्यापि ग्रहणमन्यपदार्थएव विवक्षित इत्येतमर्थमाविष्करोति । भूयोवचनस्य विशेषार्थत्वात्, सादृश्यार्थोवामत्ययः । अल्पार्थोवा । सादृश्याल्पत्वे च गुणानांव्यावर्त्तकत्वमेव नतु रूपकत्वमपि, नहि दिगंबरः पीतांबरवद्भूषितोभवतीति । व्यपदेशादिति विहायोक्तेरित्युक्त्यापि प्रतीत्यर्थमुक्तिरेवेत्यमुमर्थंस्पष्टयति, व्यपदेशस्तु विशिष्यापदेशात्माव्यवस्थापयत्यत्र विशेषमिति, उपन्यासपदमपीममर्थमुक्तंभवति उपन्यस्तस्य विवक्षितार्थप्रतीतिमात्रविश्रान्ततया तात्पर्याविषयत्वात् अत्र श्रुत्या स्मृत्याचाक्षरमिति परापरसाधारणं विहायगुरुतरपक्षग्रहणं प्रत्युदाहरणाविष्करणाय अक्षरमंबरान्त इति वक्ष्यमाणार्थाय च प्रत्युदाहरणाविष्करणायैव भूतयोनिरित्यपि नोक्तम् । न-अदृश्यत्वादिकन्तु सन्निहितदृष्टान्तमवष्टभ्य प्रधानमेवोन्नमयति, नपरम् । व्यवहितसर्वज्ञत्वाद्यनवष्टंभात्, एतेन गुणकइति धर्मोक्तेरिति चोक्तेर्विरुद्धमिदान्निर्विशेषवादिनामित्येतत्परास्तं, प्रत्युदाहरति वाक्यशेषगतस्यापि परलिङ्गस्य तत्रैव गतिसंभवे सैवादर्त्तव्येतापि परादक्षरात्परस्समाष्टिपुरुषो हिरण्यगर्भोजीव इति पूर्वपक्षप्रणयनमपि पराहतम् ।

॥ विशेषणभेदव्यपदेशाभ्यां चनेतरौ ॥

कुतोऽत्रनैकतरस्यैवोविवक्षितः । द्विसंख्याद्योतनायेति गृहाण, अथापि कुतोनक्लीबान्ततेतिचेत् श्रवणमात्रेण पुंसः प्रथममुपस्थितत्वेस्यात् । किमर्थं, यथोपस्थित्युभाभ्यामुभयोर्व्यावर्तनं, ननूभाभ्यामप्युभयोरपीति द्योतनार्थं, अतएवानपेक्ष्य लाघवं द्वंतावपि समासकरणं, कावितरौ, स्मार्तश्चशारीरश्चेति यौ पूर्वमुपात्तौ । एवंतर्हि कथं सूत्रे चकारः, नायश्चकारस्साध्यसाधनसंकलनाय प्रयुक्तः, किन्तु धर्मोक्त्यानयोस्समुच्चयार्थं । तथाचनायं स्वतन्त्रो व्यतिरेकः, किन्त्वन्वयमुखएव, तथाचभाष्यम् । “इतश्चपरमेश्वरएव भूतयोनिः, नेतरौशारीरः प्रधानंचे” ति ।

अथकथमेवंसत्येतत् क्रमव्युत्क्रमेण पूर्वपक्षप्रणयनंभाष्यइतिचेन्न न्याय्यत्वात्प्रक्रंस्यमानावलंबनापेक्षयाप्रक्रान्तावलंबनस्य तथाच, ननुमास्त्वन्तर्यामीस्मार्त्तोवाशारीरोवा अयन्तुभवतितद्वाऽयंवेतिप्रक्रान्तसङ्गत्यापूर्वपक्षप्रणयनेकानुपपत्तिरिति कथन्तर्ह्युपक्रमव्युत्क्रमेणोपसंहरणं सूत्रकारस्येतिचेन्न श्रुत्यनुसरणात् श्रुतिस्तुप्रथमंशारीराद्विशिंषन्त्यन्तेप्रधानात्भिनत्ति भूतयोनिमितिसएवानुसर्तव्योऽनुसृतः क्रमइति । ननु विशेषणेनप्रधानमपिकुतोनव्यावर्त्येत, नव्यावर्त्येत, कुतः, शास्त्रकारानिष्टेः । नेच्छतोहिशास्त्रकारौविशेषणेनप्रधानस्यापिव्यावृत्तिं सूत्रभाष्यकारौ श्रुतिमनुरुन्धानौ असंभवाच्च नहिविषणेनप्रधानस्यव्यावृत्तिस्संभवतिभिन्नजातीयस्य समानजातीयंहिव्यावर्त्तयेद्विशेषणं , नहिनीलमुत्पलमित्युक्तेघटाद्व्यावृत्तिमभिप्रैतिकश्चित , तथादिव्योह्यमूर्त्तः पुरुषइत्युक्तेऽपिनक्कोपिप्रधानाद्व्यावृत्तिमध्यवस्येदिति । अथ कुतः पूर्वाधिकरणएवैवं क्रमोनादृतइतिचेत् , आद्रियेत, यदित्वच्छन्दोनुसर्त्तव्यस्स्यात् , न्यायोह्यनुसरणीयः , प्रबलाप्रबलयोर्मध्येऽप्रबलः प्रथमं प्रबलः पश्चात्पक्षोऽवलंबनीयइति हिन्यायः तत्रस्मार्त्तमतद्धर्माभिलापापनोद्यतयालघीयः

अत्रतु कथंचिदेवभूतयोनित्वाच्छारीरस्तादृशइति। अन्यदपीदमनर्थयं, पूर्वन्तूपास्यकुक्षिप्रवेशाहमव्यसंभूतिपदाभिधेयं प्रधानमतद्धर्माभिलापान्नात्रतदुपास्यतयोक्तमित्युपपाद्य, शारीरस्तु वस्वादिभावेनोपास्योऽप्युपासकएवतत्वेन, स्वरूपतस्तु शुद्धत्वान्नोपास्यस्वतंत्रतः, इत्युपपादनायभेदेनाध्ययनमुपात्तमुपासनपरिरक्षणार्थं, अत्र तु ज्ञेयविषये प्रधानाद्विभेद्यज्जडाच्चैतन्यमिति भेदव्यपदेशउपात्तः। शारीरस्तु स्वरूपतो ज्ञेयएवेति तत्वेनैवव्यावर्तितो विशेषणेनैवेति। ननु, सत्यप्येवमक्षरमिति प्रकृतिमक्षरात्परतःपरः पुरुषइति समष्टिपुरुषं हिरण्यगर्भञ्चैकराशीकृत्य प्रत्यवस्थानमत्रेति, सूचयतीतराविति समासकरणेन। तेन प्रकृतिपुरुषौवा प्रकरणप्रतिपाद्यौ उत परोवा प्रकरणीति द्विकोटिकएवात्र विकल्पः, नतु, त्रिकोटिक इति वर्णयति श्रीभाष्यकारः केन हेतुनेति चेत् सएव प्रष्टव्यः। नहि तत्रोपपत्तिं पश्यामः। नहि सूत्रे प्रकृतित्वपुरुषत्वाभ्यान्तावुपात्तौ, श्रुतावप्यक्षरत्वेनैव प्रकृतिरुपात्तेति वक्तव्यं, तत्र कथं सांख्यपरिभाषावलंबनावकाशः, किञ्च शास्त्रदृष्ट्यातूपदेशः, सर्वत्र प्रसिद्धोपदेशादित्युक्त्यनन्तरमपि सब्रह्मविद्यां, सर्वविद्याप्रतिष्ठामित्यस्यादत्तावकाशं कथं प्रकरणमेवान्यपरमिति प्रत्यवस्थातुं शक्यं, ततो नोपपद्यत एवेयं प्रक्रियेति, अस्तु कथं प्रतिकृतिः, उभाभ्यामप्युभयोरपि व्यावर्त्तनमिति, मिथ्यैवैतत्, कथन्नाम यादृशविशेषणविशिष्टतयोच्यमानोऽपि हिरण्यगर्भइत्युपात्तस्सकथं विशेषणइति वचनमात्रेण निराक्रियेत, विजातीयावा प्रकृतिः, अक्षराद्भेदव्यपदेशनवा ततोभिन्नो हिरण्यगर्भश्च, नन्वक्षरात्परो हिरण्यगर्भः ततःपरतयोच्यतेऽयं दिव्यः पुरुषइत्यर्थावलंबनेन सोऽपि निराकृतइत्याह इदमपि मिथ्यैव, कथं, कथमव्यक्तात्पुरुषः परः, पुरुषान्नपरं किञ्चिदित्यनया समानार्थिकामेनामेवं व्याकुर्यादसति प्रयोजनान्तरे व्यावर्त्तितव्यावर्त्तनायैवे-

ति. समासोऽपि लाघवार्थैकेनैव वाक्येनोभावपि व्यावर्त्तयति श्रुतिरिति सूचनायच तेन वाक्यान्तरोक्तविशेषणोपादनमपि परकीयं परांहतमिति ।

तदेवं यंधीराः परमुन्नयन्ति कवयो येनैव विद्या परा
पश्यन्तः परितस्तएव मुनयो यद्भूतयोन्यक्षरम् ।
यच्चादृश्यमतीव सूक्ष्ममधियन्नित्यं परादक्षरात्
सोपाणोह्यमनाश्चकास्तु हृदये जीवेशसाक्षी शिवः ॥

॥ इत्यदृश्यत्वाद्यधिकरणम् ॥

## ॥ वैश्वानरस्साधारणशब्दविशेषात् ॥

वृत्तंच निगमयन्वार्त्तिष्यमाणञ्चोपसूचयन्नारचयत्याधिकरणं "वैश्वानरस्साधारणशब्दविशेषादि" त्यादिना साधारणशब्दोहि विशेषितोऽस्मिन् पादे सर्वत्र यथात्र, अत्र स्मर्यमाणमनुमानं स्यात्, यदिस्यात्, यतोऽत्रापेक्ष्यते विवक्षितत्वसाधकतयाऽनुमानमस्पष्टत्वात् ब्रह्मलिंगस्य, कुतोऽस्पष्टता, शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च, यथाचार्भकौकस्त्वात्तद्व्यपदेशाच्च, ततो नब्रह्मेतिचेत् कुतोऽनपेक्षा, अथ स्मृतेश्चेति कुतोनोच्यते,नोच्यते वैश्वानरपदघटनेनानुच्यमानत्वात् अथ कथं स्तुत्यर्थं स्मर्यमाणमनुमानं स्यात् स्यादित्येवहेतोर्विशेष्यतएवायं वैश्वानरशब्दोब्रह्मणि लक्षणयायथाकाशादिशब्दः, आत्मशब्दश्च शक्तिनियन्त्रणयायथा मनोमयादिशब्दः, यतो मूलभूतां श्रुतिमनवलोक्य न शक्यते केवलया पुरुषबुध्याऽभ्यूहितुमीदृशंरूपं, ततो वैश्वानरः परएवपरसंबन्धितया स्मर्यमाणरूपवत्वादिति स्यादेवानुमानमिति विचारञ्चोपसंहरतीतीति । तथाच भाष्यं "वैश्वानरः परमात्मैवेत्यर्थ इत्युपसंहारसंसूचकम् ॥

ततः पुनर्विचारमारभते । शब्दादिभ्य इति शाखान्तरादाहृतेभ्यो विचारितोऽयं प्रथमं शब्दान्तरलाक्षणिकीकरणेन विचा-

रितश्च पुनरसाधारणानां विशेषणेन, विचारविषयेणैव परं साधा-
रणीकृतानां स्वशब्दीकरणेन वैलक्षण्यमुच्यते । किञ्च पुनर्विचारप-
वायं । यत्रैतदुभयं श्रुतमिति संपादनीयं यदपि निर्धारितं कोऽस्य-
के नै वैश्वानरे तेनैव विशिष्टस्योपहितस्य वाऽऽत्मनो दृष्टृपदघटवाक्य
विचारणात् । एवं पुनर्विचारोपक्रमाय प्रक्रान्तविचारोपसंहारपरेऽ
पीति पदे यदि शीर्षमिदं पादोऽयमित्यविज्ञाय इति एवं प्रकारं स्मर्य-
माणं । अन्यत्र श्रुत्यादिषु प्रसिद्धमिह प्रत्यभिज्ञायमानमनुमानस्या-
दिति पादेन शीर्षं ग्रथयन्नपि श्रीभाष्यकार इति प्रथंतक्रमतोऽन्य-
स्ति विचित्रम् । अनुस्मृतेरिति सूत्रकृतैव वक्ष्यमाणत्वान्नाप्रसिद्ध-
मस्मिन्नर्थे पदमिदमिति निर्लज्जमनुरहितमप्यनुसंहितेन समानयन्ति,
स्यात्पदमपि व्यर्थयन्ति, नेमां श्रुतिमनुमापयेद्वैश्वानर पदघटितान्त-
दघटितास्मृतिः, किन्त्वग्निमूर्द्धे त्यादिकामेवानुमापयन्त्यनुमापयेत्त-
द्विधुरामित्यस्मानपिदूषयन्ति । तेनमूलमूलिभ्यां शब्दतोऽप्यन्यूनान-
धिकाभ्यामेव भवितव्यमितिनिर्बन्धश्च कुर्वन्तिपरे ॥

अस्त्वत्र कस्साधारणश्शब्दः, नन्वस्त्यत्रात्मेति जीवेशसा-
धारणः, वैश्वानरइति जाठरादित्रयसाधारणश्च, न, एकेनैवहिपरा-
परसाधारणेन भवितव्यं पक्षीकृतेनच तथाहि मनोमयः, अत्ता गुहां
प्रविष्टौ, अन्तरः, अन्तर्यामीति परापरसाधारणःपक्षीकृतस्सर्वत्रेति
चेत् न प्रकृतेऽपि प्रकारान्तरेण साधारणीकरणात्, आत्मशब्दस-
मानाधिकरणोह्यत्र वैश्वानरशब्दः, सयद्यात्मशब्दं गौणयति तदा
जाठरादित्रयसाधारणः, यदीतरइतरं लाक्षणिकयति तदा जीवेश-
साधारणइत्येवं साधारणशब्दविशेषोयं पूर्वेभ्योविलक्षणः, गौण-
यत्येवात्मशब्दं विशेष्यवाचीवैश्वानरशब्द इति जाठरादयोवा, लाक्ष-
णिकत्वपक्षेऽपि जाठरसन्निकृष्टो जीवोवावैश्वानर इति पूर्वपक्षे, सा-
धारणशब्दविशेषादित्याह । लाक्षणिकीकरणं शक्तिनियन्त्रणञ्चात्र-
विशेषः । अत्र वैश्वानरशब्दएव जीवेतरचतुष्टयसाधारणः, आत्म-